Patanjali
Mahabhasyapradipodyotah

BIBLIOTHECA INDICA:


A

COLLECTION OF ORIENTAL WORKS

PUBLISHED BY THE

ASIATIC SOCIETY OF BENGAL.

NEW SERIES, No. 1002.



महाभाष्यप्रदीपोद्योतः ।

MAHĀBHĀṢYAPRADĪPODDYOTA

BY

NĀGEÇA BHAṬṬA

EDITED BY

PAṆḌIT BAHUVALLABHA ÇĀSTRĪ.

VOL. II, FASCICULUS II.

CALCUTTA:

PRINTED AT THE BAPTIST MISSION PRESS,

AND PUBLISHED BY THE

ASIATIC SOCIETY, 57, PARK STREET,

1901.

LIST OF BOOKS FOR SALE

AT THE LIBRARY OF THE

ASIATIC SOCIETY OF BENGAL,

No. 57, PARK STREET, CALCUTTA,

AND OBTAINABLE FROM

THE SOCIETY'S AGENTS, MESSRS. LUZAC & CO.,

46, GREAT RUSSELL STREET, LONDON, W.C., AND MR. OTTO HARRASSOWITZ, BOOKSELLER, LEIPZIG, GERMANY.

*Complete copies of those works marked with an asterisk * cannot be supplied—some of the Fasciculi being out of stock.*

BIBLIOTHECA INDICA.

Sanskrit Series.

Advaita Brahma Siddhi, (Text) Fasc. 1–4 @ /6/ each ...	Rs.	1	8
Advaitachinta Kaustubhe, Fasc. 1		0	6
*Agni Purāṇa, (Text) Fasc. 4–14 @ /6/ each		4	2
Aitarēya Brāhmaṇa, Vol. I, Fasc. 1–5 and Vol. II, Fasc. 1–5 Vol. III, Fasc. 1–5 Vol. IV, Fasc. 1–5 @ /6/		7	8
Aṇu Bhāṣyam, (Text) Fasc. 1–5 @ /6/ each		1	14
Aphorisms of Sāṇḍilya, (English) Fasc. 1		0	12
Aṣṭasāhasrikā Prajñāpāramitā, (Text) Fasc. 1–6 @ /6/ each ...		2	4
Açvavaidyaka, (Text) Fasc. 1–5 @ /6/ each		1	14
Avadāna Kalpalatā, (Sans. and Tibetan) Vol. I, Fasc. 1–5; Vol. II. Fasc. 1–5 @ 1/ each		10	0
*Bhāmatī, (Text) Fasc. 4–8 @ /6/ each		1	14
Bhāṭṭa Dīpikā Vol. I, Fasc. 1–3		1	2
Bṛhaddēvatā (Text) Fasc. 1–4 @ /6/ each		1	8
Bṛhaddharma Purāṇa, (Text) Fasc. 1–6 @ /6/ each		2	4
Bodhicaryavatara of Cantidevi, Fasc. 1		0	6
Catalogue of Sanskrit Books and MSS., Fasc. 1–3 @ 2/ each ...		6	0
Çatapatha Brāhmaṇa, Fasc. 1–5		1	14
*Caturvarga Chintāmaṇi (Text) Vols. II, 1–25; III. Part I, Fasc. 1–18. Part II, Fasc. 1–10 @ /6/ each		19	14
Çlokavartika, (English) Fasc. 1–2		1	8
*Çrauta Sūtra of Āpastamba, (Text) Fasc. 4–16 @ /6/ each ...		4	14
Ditto Çānkhāyana, (Text) Vol. I, Fasc. 1–7; Vol. II, Fasc. 1–4, Vol. III, Fasc. 1–4 @ /6/ each		5	10
Çrī Bhāshyam, (Text) Fasc. 1–3 @ /6/ each		1	2
Gadadhara Paddhati Kālasāra Vol I. Fasc. 1–3		1	2
Kāla Mādhava, (Text) Fasc. 1–4 @ /6/ each		1	8
Kāla Viveka, Fasc. 1–4		1	8
Kātantra, (Text) Fasc. 1–6 @ /12/ each		4	8
Kathā Sarit Sāgara, (English) Fasc. 1–14 @ /12/ each		10	8
Kūrma Purāṇa, (Text) Fasc. 1–9 @ /6/ each		3	6
Lalita-Vistara, (English) Fasc. 1–3 @ /12/ each		2	4
Madana Pārijāta, (Text) Fasc. 1–11 @ /6/ each...		4	2
Mahā-bhāṣya-pradīpōdyōta, (Text) Fasc. 1–9 & Vol. II, Fasc. 2 @ /6/ each		4	2
Manuṭikā Saṇgraha, (Text) Fasc. 1–3 @ /6/ each		1	2
Mārkaṇḍēya Purāṇa, (English) Fasc. 1–6 @ /12 each		4	8
*Mīmāṁsā Darçana, (Text) Fasc. 7–19 @ /6/ each		4	14
Nārada Smṛti, (Text) Fasc. 1–3 @ /6/		1	2
Nyāyavārtika, (Text) Fasc. 1–4 @ /6/		1	8
*Nirukta, (Text) Vol. III, Fasc. 1–6; Vol. IV, Fasc. 1–8 @ /6/ each ...		5	4
Nityacarapaddhati Fasc. I–II (Text) @ /6/		0	12
Nyayabinduṭika, (Text)		0	10
Nyaya Kusumāñjali Prakaraṇa (Text) Vol. I, Fasc. 1–6 Vol. II, Fasc. 1–3 @ /6/ each		3	6
Padumawati Fasc. 1–3 @ 2/		6	0

(तत्पुरुषः समानाधिकरणः कर्मधारयः। १। २। ४२।)

[1]अथवेति। (कै)

अन्तर्वर्त्तिविभक्त्यपेक्षस्तूत्तरपदादिव्यवहार इति भावः॥ नन्वेकविभक्तीति पुनरुक्तमत आह

[2]एककारकत्वमिति। (कै)

विभज्यतेऽनया प्रातिपदिकार्थ इति व्युत्पत्तेः॥

तद्यः (भा)

इत्यादि भाष्ये

ताच्छब्द्यम् (भा)

इति स्वार्थे ष्यञ्। "तत्" ततो हेतोर्मुख्यार्थे समानाधिकरणासंभवाद्धेतोर्यस्मादर्थात्तच्छब्दः तस्येदं ग्रहणमित्यक्षरार्थः। यद्वा यस्मादर्थात्ताच्छब्द्यं तच्छब्दवाच्यतां लभत इति शेषः॥

[3]अन्तरङ्गन्त्विति। (कै)

अर्थनिबन्धनसामानाधिकरण्याश्रयोऽन्तरङ्गन्यायस्तत्पुरुषशब्दमात्राश्रयगौणमुख्यन्यायात् प्रबल इति भावः॥ ननु तत्पुरुषार्थ-

---

१ अथवा समासाद्विभक्त्युत्पत्तौ सत्यां एकपद्यमुच्यते॥

२ एककारकत्वमित्यर्थः॥

३ तत्पुरुषस्य पदान्तरेण सामानाधिकरण्यं बहिरङ्गमन्तरङ्गं तु वर्त्तिपदानामिति तदेवाश्रीयते। ततश्च सामर्थ्यात्तत्पुरुषशब्दो गौणार्थवृत्तिः परिगृह्यते तेन समासावयवानामेव पदानां कर्मधारयसंज्ञा विधीयते समुदाये च वाक्यपरिसमाप्त्या पदसमुदायस्यैकैव कर्मधारयसंज्ञा न तु प्रत्येकम्। तत्पुरुषसंज्ञाप्रकरणे इयं संज्ञा न कृता एकसंज्ञाधिकारात् तत्पुरुषसंज्ञाया बाधा मा भूदिति॥

पदानां कर्मधारयसंज्ञालाभेऽपि समुदायस्य सा न स्यात् । दृश्यते च तस्य इत्यत आह

समुदाये चेति । (कै)

समानाधिकरणपदम् अर्थ आद्यजन्तन्तु नाश्रितं तादृशानामपि गौणत्वाद् ॥

वाधा मा भूदिति । (कै)

"तत्पुरुष" इत्यनुवृत्तावपि पाचिको वाधो माभूदित्यर्थः । समानाधिकरणः कर्मधारयश्च इति तु सुवचम् [1]"द्विगुश्चे"ति वत् ॥

---

[2]प्रथमानिर्दिष्टं समास उपसर्जनम् । १ । २ । ४३ ॥

समासे किमिति । (कै)

समासे इति सप्तमीनिर्देशात् समासे विद्यमानं प्रथमान्तमिति सूत्रार्थं मत्वा वार्त्तिकारम्भ इत्याशयः ॥

---

१ द्विगुश्च । २ । १ । २३ ॥
२ प्रथमानिर्दिष्टं समास उपसर्जनमिति चेदनिर्देशात् प्रथमायाः समासे संज्ञाप्रसिद्धिः । वा । प्रथमानिर्दिष्टं समास उपसर्जनमिति चेदनिर्देशात् प्रथमायाः समास उपसर्जनसंज्ञायाः अप्रसिद्धिः ।

(प्रथमानिर्दिष्टं समास उपसर्जनम् । १। २। ४३ ।)

तत एवेति । (कै)

समासादेवेत्यर्थः। तथा च समासः प्रथमानिर्दिष्टः स्यात् । न तु समासे किं चिदिति सप्तम्यनुपपत्तिः स्यादिति भावः ॥

अन्तर्वर्त्तिन्येति । (कै)

समासे विद्यमानाद् यतः प्रथमोच्चार्य्येत इत्यर्थ इति भावः ॥

न कष्टशब्दस्येति । (कै)

तच्चानिष्टमिति भावः ॥

प्रथमान्तमिति । (कै)

संज्ञाविधौ प्रत्ययग्रहणे तदन्तविधिप्रतिषेधादन्तपदोच्चारणम् ॥

मुख्यार्थासम्भवादिति । (कै)

निर्दिष्टग्रहणोपलक्षितसमासग्रहणस्य मुख्यार्थाऽसम्भवादिति अर्थः ॥ ननु प्रत्यासत्त्या यत् समासशास्त्रे यत् प्रथमानिर्दिष्टं तन्निरूपितकार्य्ये एव तदुपसर्जनं स्यादत आह

न हि कष्टादीनां समासे (२ । १ । २४) प्रथमां पश्यामः ॥ सिद्धन्तु समासविधाने वचनात् । वा । सिद्धमेतत् । कथम् । समासविधाने प्रथमानिर्दिष्टमुपसर्जनसंज्ञं भवतीति वक्तव्यम् ॥ तत्तर्हि वक्तव्यम् । न वा तादर्थ्यात्ताच्छब्द्यम् । वा । न वा वक्तव्यम् । किं कारणम् । तादर्थ्यात्ताच्छब्द्यं भवति ("भविष्यति" इति पाठोऽपि दृश्यते ॥) समासार्थं शास्त्रं समास इति ॥ यस्य विधौ प्रथमानिर्देशस्ततोऽन्यत्राप्युपसर्जनसंज्ञाप्रसङ्गः ("अन्यत्रोपसर्जनसंज्ञाप्रसङ्ग" इत्यपि दृश्यते)। वा । यस्य विधौ प्रथमानिर्देशः क्रियते ततो ऽन्यत्रापि तस्योपसर्जनसंज्ञा

(प्रथमानिर्दिष्टं समास उपसर्जनम् । १। २। ४३ ।)

निर्देशापेक्षयेति । (कै)

ईदृशप्रत्यासत्तिर्दुर्ज्ञेयेति भावः ॥

सत्युपेति । (कै)

परिनिष्ठितविभक्त्या समास इति पक्षे इदम् । इदमेव ध्वनयितुं भाष्ये "श्रित" पदोपादानम् ॥ अवयववृत्त्या सर्वनामादिपदैरिवानेनाभीष्टार्थालाभादाह

लोके चेति । (कै)

संज्ञामहत्त्वमेतत्पदरूढ्यर्थभूतलौकिकार्थापरित्यागे हेतुरिति भावः ॥ अप्रधानस्यैव संज्ञित्वे ऽव्याप्तिः शङ्कते

यद्येवमिति ॥ (कै)

प्राप्नोति । राज्ञः कुमारीं राजकुमारीं श्रितः । श्रितादिसमासे द्वितीयान्तं प्रथमानिर्दिष्टं तस्य षष्ठीसमासेऽप्युपसर्जनसंज्ञा प्राप्नोति (१ । २ । ४८ ॥ २ । २ । ३०) ॥ सिद्धं तु यस्य विधौ तं प्रतीति वचनात् । वा । सिद्धमेतत् । कथम् । यस्य विधौ प्रथमानिर्दिष्टं तं प्रति तदुपसर्जनसंज्ञं भवतीति वक्तव्यम् । तत्तर्हि वक्तव्यम् । न वक्तव्यम् । उपसर्जनमिति ("हि" इति पाठोऽप्यस्ति) महती संज्ञा क्रियते । संज्ञा च नामयतो न लघीयः । कुत एतत् । लघ्वर्थं हि संज्ञाकरणम् । तत्र महत्याः संज्ञायाः करण एतत् प्रयोजनमन्वर्थसंज्ञा यथा विज्ञायेत । अप्रधानमुपसर्जनमिति । प्रधानमुपसर्जनमिति च सम्बन्धिशब्दा-

(प्रथमानिर्दिष्टं समास उपसर्जनम्। १। २। ४३।)

पुरुषव्याघ्र इति। (कै)

इदमुदाहरणं चिन्त्यम् "[1]परवल्लिङ्ग" सूत्रस्थतत्पुरुषग्रहण-प्रत्याख्यान परेण भाष्येण तस्योत्तरपदप्रधानता सूचनात्॥ ननु संज्ञाविधानमेव कथं तत्प्रयोजकाभावेऽत आह

प्रथमानिर्देशेति। (कै)

पूर्वापराधरोत्तरम् अर्धमिति। एतेन प्रदेशेष्वन्वर्थत्वेनैव व्यवहारोपपत्तौ संज्ञाविधानं व्यर्थं स्यादित्यपास्तम्। निर्विभक्तिकस्योच्चारणासम्भवात् प्राथम्याच्च लघुत्वाच्च तन्निर्देशस्य सत्त्वेन तत् सामर्थ्यं चिन्त्यम्॥ भाष्ये

प्रधानमुपसर्जनमिति च
सम्बन्धिशब्दौ इति। (भा)

तत्र "अप्रधानम्" इति दृष्टान्तार्थं तद्वदुपसर्जनशब्दस्तत्प्रतिद्वन्द्विप्रधानार्थकत्वात् "सम्बन्धिशब्द" इति भावः॥ तदाह

---

१ परवल्लिङ्गं द्वन्द्वतत्पुरुषयोः। २। ४। २६॥

वेतौ। तत्र सम्बन्धादेतद्गन्तव्यं यं प्रति यदप्रधानं तं प्रति तदुपसर्जनसंज्ञं भवतीति॥ अथ यत्र द्वे षष्ठ्यन्ते कस्मात्तत्र प्रधानस्योपसर्जनसंज्ञा न भवति। राज्ञः पुरुषस्य राजपुरुषस्येति (२। २। ८)॥ षष्ठ्यन्तयोश्चोपसर्जनत्व उक्तम्। वा। किमुक्तम्। षष्ठ्यन्तयोः समासे ऽर्थाभेदात् प्रधानस्यापूर्वनिपात इति (२। २। ३०)॥

(प्रथमानिर्दिष्टं समास उपसर्जनम्। १। २। ४३।)

यं प्रति यदिति। (भा)

समासे प्रथमानिर्दिष्टमप्रधानत्वसमानाधिकरणोपसर्जनपदाभिन्नमिति सूत्रार्थः। एवं च प्रत्यासत्त्या यन्निरूपितमप्रधानत्वं तन्निरूपितमेवोपसर्जनसंज्ञाकार्य्यं पूर्वनिपात इत्यर्थः। ह्रस्वोऽपि नायं प्रत्यप्रधानत्वं तद्घटितसमासोत्तरपदभूतस्यैव ह्रस्वविधानात्॥ परेतु "यं प्रति" इत्यादिभाष्यस्यायमर्थः। समासशास्त्रे यन्निरूपितं यस्याप्राधान्यं तं प्रति तदुपसर्जनम् इति समासशास्त्रे च सहार्थतृतीयार्थापेक्षया प्रथमान्तार्थस्याप्रधानत्वमिति तं प्रत्येव तदुपसर्जनम्। यद्यपि सहार्थविशेषणत्वरूपम् प्राधान्यं तृतीयान्तार्थस्य तथापि तत् समभिव्याहृतप्रथमाद्यन्तार्थस्य तदपेक्षया लौकिकमप्रधानत्वमितराधीनत्वरूपं बुध्यते। अत एव समकक्षयोर्मध्ये एकेन सह त्वया गन्तव्यमित्युक्ते परस्य दुःखं दृश्यते पूर्वकायासिद्धा कैयटोक्ततदाश्रयणमशक्यमित्याहुः। इत्यभिप्रायेण भाष्ये

अथ यत्रेति। (भा)

एवं न चेदमकृतं भवेदुपसर्जनं पूर्वमित्यर्थस्याभिन्न इति कृत्वा प्रधानस्य पूर्वनिपातो न भविष्यति॥ यद्यपि तावदेतदुपसर्जनकार्य्यं परिहृतमिदमपरं प्राप्नोति। राज्ञः कुमार्य्याः। राजकुमार्य्याः "गोस्त्रियोरुपसर्जनस्य" (१।२।४८) इति ह्रस्वत्वं प्राप्नोति। उक्तं वा। वा। किमुक्तम्। परवल्लिङ्गमिति शब्दशब्दार्थाविति। (परवल्लिङ्गमिति शब्दशब्दार्थौ। वा। परवल्लिङ्गमिति शब्द-

"परिहारान्तर" इत्यादिकैयटश्चिन्त्य एव। उपसर्जनसंज्ञाप्रयोज्यत्वं पूर्वनिपातस्य नास्तीति दर्शयितुं पूर्वनिपातप्रकरणप्रत्याख्यानमनुवदति

तत्र हीति। (कै)

एवं हि तत्र भाष्यमुपसर्जनस्य पूर्ववचनं परप्रयोगनिवृत्त्यर्थं न वा निष्ठादर्शनात्॥ अथ यत्र द्वे षष्ठ्यन्ते कस्मात् तत्र प्रधानस्य पूर्वनिपातो न भवतीत्याशङ्कायां

षष्ठ्यन्तयोः समासे (भा)

इत्यादि॥

अनिष्टेति। (कै)

नित्येषु शब्देषु प्रयोगे स्थिते [1]गव्यादिप्रयोगनिवारणाय शास्त्रम् इह तु पुरुषराजेति प्रयोगो न दृश्यते इति। किं तन्निवृत्त्यर्थेन यत्नेनेत्यर्थः॥ अबुधबोधनाय तदारम्भे पूर्वपक्षिणाशंकितस्य राज्ञः

---

१ गाव्यादि-। इ॥

शब्दार्थावति दिश्येते। तत्रौपदेशिकस्य ह्रस्वत्वमातिदेशिकस्य श्रवणं भविष्यति॥ इदं तर्हि। दत्ता च कारीषगन्ध्या च दत्ताकारीषगन्ध्ये। दत्ता च गार्ग्यायणी च दत्तागार्ग्यायण्यौ। द्वौ ष्यङौ द्वौ ष्फौ च प्राप्नुतः (४। १। ७८-१७)। स्ताम्। पुंवद्भावेनैकस्य निवृत्तिर्भविष्यति (६। ३। ३५)॥ इदं तर्हि। दत्ता च युवतिश्च। दत्तायुवती। द्वौ तिशब्दौ प्राप्नुतः (४। १। ७७)।

(प्रथमानिर्दिष्टं समास उपसर्जनम् । १। २। ४३ ।)

पुरुषस्य इत्यादौ [१]पूर्वनिपातितानि यमदोषस्योद्धारपरं षष्ठ्यन्तयोरितिवार्त्तिकं तद्व्याचष्टे

तथापीति । (कै)

पुरुषस्य पूर्वनिपाते हि राज्ञः प्राधान्यमेव स्यात् पुरुषराजशब्दात् तथैव प्रतीतेरिति वाक्यसमासयोर्भिन्नार्थतेति भावः ॥

नासौ भिद्यते इति । (कै)

वाक्यात् समासे इति शेषः । पूर्वनिपाते हि तस्याप्राधान्यं प्रतीयेतेति भावः ॥ तदेवाह

न व्यतिरिच्यते इति । (कै)

व्यतिरेको विशेषणत्वं तदा न भवतीत्यर्थः ॥ परेतु ननु प्रधानस्य पूर्वनिपातेऽपि "अर्धपिप्पली"त्यादौ न वाक्यसमासयोर्भिन्नार्थतेत्यतो भाष्यं प्रकारान्तरेण व्याचक्षते

---

१ "पूर्वनिपातितानि" इत्यारभ्य "पुरुषस्य" इत्यन्तं नास्ति । इ ॥

तस्मान्नैतच्छक्यं वक्तुं शब्दशब्दार्थावतिदिश्येते इति । ननु चोक्तं समासादन्यलिङ्गमिति चेदश्ववडवयोष्टाबलुग्वचनमिति । परिहृतमेतन्निपातनात् सिद्धमिति ॥ अथवा नैवं विज्ञायते परस्यैव परवदिति । कथं तर्हि । परस्येव परवदिति । यथा जातीयकं परस्य लिङ्गं तथा जातीयकं समासस्यातिदिश्यते ॥) तत्रौपदेशिकस्य ह्रस्वत्वमातिदेशिकस्य श्रवणं भविष्यति ॥

षष्ठीति (पा)

सूत्रे येन समासस्तन्निरूपितसम्बन्धार्थकषष्ठ्यन्तमेव गृह्यते तदेव च तत्र "प्रथमानिर्दिष्टं" पुरुषपदे च न राजापेक्षभेदसम्बन्धे षष्ठी तस्याविशेषणादेवोत्पत्तेरित्यर्थः॥

अर्थश्चाभिन्न इति (भा)

भाष्यस्य प्रधानोऽर्थो न समासघटकविशेषणेन भेदमूलकसम्बन्धवानतः प्रधानस्य तादृशषष्ठ्यन्तत्वाभावादनुपसर्जनत्वेनापूर्वनिपातः। कैयटरीत्यातु प्रधानपक्षकापूर्वनिपातानुमाने हेतोर्वैयधिकरण्यम्। उपसर्जनसंज्ञा न भविष्यतीत्यनेन पूर्वनिपाताभावः। प्रधानस्यैतन्मूलक एव तत्रापीति सूचितम्। किं च कैयटरीत्या व्याख्यानेन प्रयोजनानुवर्त्तिप्रमाणमिति न्यायविरोधः। कैयटोऽपि वा एवमेव व्याख्येयः। एवं च पुरुषापेक्षयाऽप्रधानस्यैव राज्ञः षष्ठ्यन्तस्य प्रथमानिर्दिष्टत्वमस्मिन् समासे इति तस्यैवोपसर्जनत्वेन पूर्वनिपात इति भावः॥ राजकुमार्य्या इत्यादौ ह्रस्वत्वमपि अनेन वारितमिति सूचयन् आह

उक्तं वेति। (भा)

विकल्पार्थवाशब्दघटितमन्यथा तदसंगतिः॥

हृक्षोक्षिकेति। (कै)

अर्धपिप्पल्यादौ तु गतिरुक्तैवेति भावः॥

---

[1]एकविभक्ति चापूर्वनिपाते। १। २। ४४॥

स्पष्टप्रतिपत्तये सूत्रार्थं दर्शयति

समास इति ॥ (कै)

समासार्थं वेति। (कै)

अस्त्याद्यपेक्षया बहिरङ्गक्रियाध्याहारात्मलक्षणां युक्तां मन्यते शास्त्रं तु न गच्छते "एकविभक्तौ"त्यस्य वैयर्थ्यापत्तेः॥

सर्वस्य चेति। (कै)

एकस्मिन् योगे इत्यादिः॥

---

१ द्वितीयादीनामप्यनेनोपसर्जनसंज्ञा प्राप्नोति। तत्र को दोषः। तत्रापूर्वनिपात इति प्रतिषेधः प्रसज्येत॥ नाप्रतिषेधात्। नायं प्रसज्यप्रतिषेधः पूर्वनिपाते नेति। किं तर्हि। पर्युदासोऽयं यदन्यत्पूर्वनिपातादिति। पूर्वनिपातेऽव्यापारः। यदि केनचित् प्राप्नोति तेन भविष्यति। पूर्वेण च प्राप्नोति तेन भविष्यति। अप्राप्तेर्वा। अथवानन्तरा या प्राप्तिः सा प्रतिषिध्यते। कुत एतत्। अनन्तरस्य विधिर्वा भवति प्रतिषेधो वेति। पूर्वा प्राप्तिरप्रतिषिद्धा तया भविष्यति। ननु चेयं प्राप्तिः पूर्वां प्राप्तिं बाधते। नोत्सहते प्रतिषिद्धा सती बाधितुम्॥ एकविभक्तावषष्ठ्यन्तवचनम्। वा। एकविभक्तावषष्ठ्यन्तानामिति वक्तव्यम्। इह माभूत् (१। २। ४८) अर्धं पिप्पल्या अर्धपिप्पली इति (२। २। २)॥ उक्तं वा। वा। किमुक्तम्। परवल्लिङ्गमिति शब्दशब्दार्थाविति (२। ४। २६) तत्रौपदेशिकस्य ह्रस्वत्वमाति-

श्रितादिविशेषणत्वादिति। (कै)

कर्माकाङ्क्षश्रितादिविशेषणत्वादित्यर्थः॥ ननु निरवकाशापूर्व-प्राप्त्या इयं प्राप्तिर्बाध्येतात आह

पूर्वसूत्रस्य त्विति॥ (कै)

अपवादेति। (कै)

अपूर्वनिपात इति हि सः॥ भाष्ये

एकविभक्ताविति। (भा)

"शब्दशब्दार्थौ" इत्यस्य प्रत्याख्याने इदं वचनमेव कर्त्तव्यम्। एकदेशिसमासविषयकमेव तत्। भाष्ये तथोदाहरणात्॥ नन्वेव-मपि "प्राप्तजीवक" इत्यादौ परवल्लिङ्गं स्यात्। एवं स्त्रीगोव्यक्तिभिः क्रीतपटेषु पञ्चगूनिजीष्यते न च सिध्यतीत्यत आह

द्विगुप्राप्तेति। (कै)

देशिकस्य श्रवणं भविष्यति॥ कानि पुनरस्य योगस्य प्रयोजनानि। प्रयोजनं द्विगुप्राप्तापन्नालं पूर्वोपसर्गाः क्तार्थे। वा। द्विगुः (२। १। ५१) पञ्चभिर्गोभिः क्रीतः पञ्चगुः। प्राप्तापन्ने (२। २। ४)। प्राप्तो जीविकां प्राप्तजीविकः। आपन्नो जीविकामापन्नजीविकः॥ अलं पूर्वे (२। २। १८)। अलं कुमार्यै अलं कुमारिः॥ उपसर्गाः क्तार्थे (प्रादयः क्तार्थे। वा। प्रादयः क्तार्थे समस्यन्त इति वक्तव्यम्। प्रगत आचार्यः प्राचार्यः। प्रान्तेवासी। प्रपितामह। एतदेव च सौनाग-विस्तरतरकेन पठितम्। स्वती पूजायाम्। स्वती पूजयामिति वक्तव्यम्। सु राजा। अति राजा। २। २। १८)। निष्कौशाम्बिः। निर्वाराणसिः॥

वस्तुतो द्विगुग्रहणं परवदित्यस्यान्तरङ्गत्वेन तत्पुरुषसंज्ञकशब्द-मात्र निमित्तकलिङ्गबाधकताया एव युक्तत्वाद्व्यर्थमिति बोध्यम् ॥

पर्य्यादय इति । (कै)

[1]"कुगतीति" सूत्रे आदिशब्दस्य प्रकारार्थत्वादिति भावः ॥

अलं शब्दयोगे चतुर्थीविधानसामर्थ्याद्वाक्यमपीत्याहुः ॥

इति श्रीशिवभट्टसुतसतीगर्भजनागोजीभट्टकृते
महाभाष्यप्रदीपोद्योते प्रथमस्य
द्वितीये प्रथमाह्निकम् ॥

---

१ अ २ । पा २ । सू १८ ॥

महाभाष्यप्रदीपोद्योतः ॥

पाणिनिकात्यायनपतञ्जलिभ्यो गुरुभ्यो नमः ॥

अर्थवदधातुरप्रत्ययः प्रातिपदिकम् ।

१ । २ । ४५ ॥

अभिधेयेति । (कै)

सर्वशब्दानां प्रयोजनवत्त्वेनाव्यभिचारात् प्रयोजनवाचिनोऽसम्भवाच्च धनवाचिनो ग्रहणाभावादिति भावः ॥

कस्येत्याकाङ्क्षायामाह

महाभाष्यम् ॥ अर्थवदिति व्यपदेशाय वर्णानां च माभूदिति । किञ्च स्यात् । वनम् धनमिति "नलोपः प्रातिपदिकान्तस्य" (८ । २ । ७) इति नलोपः प्रसज्येत ॥ अधातुरिति किमर्थम् । अहन् वृत्रमिति ॥ अधातुरिति शक्यमकर्त्तुम् । कस्मान्न भवति अहन् वृत्रमिति । आचार्य्यप्रवृत्तिर्ज्ञापयति

कैयटः ॥ अभिधेयवचनोऽत्रार्थशब्द आश्रीयते तत्राधातुरप्रत्यय इति पर्य्युदासाश्रयणादर्थवत एव संज्ञा भविष्यति नार्थोऽर्थवद्ग्रहणेनेत्याशङ्क्याह "अर्थवदिति" (भा) ॥ "व्यपदेशायेति" । (भा) । संज्ञिन इति वाक्यशेषः । पर्य्युदासाश्रयणे केन धर्मेण सादृश्यमाश्रीयत इत्यप्रतिपत्तिः स्यादिति भावः ॥

शब्दकौस्तुभः ॥ डित्थादीन्यव्युत्पन्नान्युदाहरणम् । अव्युत्पत्तिपक्षस्य चेदमेव ज्ञापकम् । यत्तु व्युत्पत्तिपक्षेऽपि निपातार्थमनुकरणार्थं चेदमिति हरदत्तेनोक्तम् । तन्न । तत्रापि प्रकृत्यादिकल्पनसम्भवादिति बोध्यम् । वस्तुतस्तु

(अर्थवदधातुरप्रत्ययः प्रातिपदिकम् । १। २। ४५।)

संज्ञिन इति । (कै)

"व्यपदेशो" विशिष्टसंज्ञिनो लाभः ॥

केनेति । (कै)

शब्दत्वादिनापि तदाश्रीयेतेति भावः ॥ नञिवयुक्तन्याया-नित्यत्वज्ञापकं तदित्यन्ये ॥ च श्रवणाद् व्यवदेशापेक्षयाभिन्नमेव तत् फलमिति भ्रमनिवृत्तये आह

न धातोः प्रातिपदिकसंज्ञा भवतीति । यदयं "सुपो धातुप्रातिपदिकयोः" (२ । ४ । ७१) इति धातुग्रहणं करोति । नैतदस्ति ज्ञापकम् । प्रतिषिद्धार्थमेतत् स्यात् । अपि काकः श्येनायत इति (३। १। ११) ॥ अप्रत्यय इति किमर्थम् । काण्डे कुड्ये (१। २। ४७)॥ अप्रत्यय इति शक्यमकर्त्तुम् । कस्मान्न भवति काण्डे कुड्ये इति । कृत् तद्धितग्रहणं (१ । २। ४६) नियमार्थं भविष्यति । कृत्तद्धितान्तस्यैव प्रत्ययान्तस्य प्रातिपदिकसंज्ञा भवति नान्यस्येति ॥

"वर्णानां मा भूदिति"। (भा)। विशिष्टसंज्ञिव्यपदेशफलं दर्शयति। क्वचिद्वर्णानां चेति पाठः (अस्माकं भाष्यपुस्तके 'वर्णानां मा भूद' इति पाठोऽस्ति । किल्हरण् प्रभृतीनां भाष्यपुस्तके 'वर्णानां च मा भूद्' इति पाठोऽस्ति)। तत्र चशब्देन पदसमुदायोऽनर्थको दशदाड़िमानीत्यादिः समुच्चीयते ॥

बहुपटव इत्याद्यर्थमिदम् । न च तद्धितग्रहणे मत्वर्थलक्षणया निर्वाहः । पचतकीत्यादावतिव्याप्तेः । अव्युत्पत्तिपक्षस्तु कपि ग्रहणेन सिद्धे कंसग्रहणेनैव ज्ञाप्यः । ज्ञापिते च तत्राप्यनेनैव संज्ञाविधाति । नन्वेतदेव ज्ञापकं बहुच्

विशिष्टेति। (कै)

च पाठस्तु प्रामादिक इति भावः॥ तमपि समर्थयते

क्वचिदिति। (कै)

समासग्रहणं त्वर्थवत् समुदायस्यैव नियामकमिति भावः॥

संख्येति। (कै)

द्व्येकयोः कर्मणीत्यादीनां स्वादिविध्येकवाक्यत्वादिति भावः॥ एवं च कार्य्याभावात् संज्ञापि न स्यादिति तात्पर्य्यम्॥

अर्थवत्यनेकपदप्रसङ्गः। वा। अर्थवति ("अर्थवदिति" इत्यपि पाठोऽस्ति) प्रातिपदिकसंज्ञायामनेकस्यापि पदस्य प्रातिपदिकसंज्ञा प्राप्नोति। दश दाडिमानि षडपूपाः कुण्डमजाजिनं पललपिण्डः अधरोरुकमेतत् कुमार्य्याः स्फैयकृतस्य पिता प्रतिशीन इति॥ समुदायोऽन्याऽनर्थकः। समुदायोऽनर्थक इति चेदवयवार्थवत्त्वात् समुदायार्थवत्त्वं यथा लोके। वा। समुदायोऽनर्थक इति चेदवयवैरर्थवद्भिः समुदाया अप्यर्थवन्तो भवन्ति यथा लोके। तद्यथा। लोक आढ्यमिदं नगरं गोमदिदं नगरमित्युच्यते न च तत्र

"किं च स्यादिति"। (भा)॥ संख्याकर्मादिषु स्वादीनां विधानादनर्थकेभ्यः स्वाद्युत्पत्तिर्नभविष्यतीति प्रश्नः। "धनमिति"। (भा)॥ ननु 'अधातुरि'ति नान्तस्य प्रतिषेधो भविष्यति। "नैतदस्ति"। (भा)। प्रतिवर्णमत्र विभक्त्युत्पत्तिप्रसङ्गः। न च प्रतिवर्णं धातुसंज्ञासमावेशः। अयं भावः। अविशेषेण स्वादय उत्पद्यन्ते तेषूत्पन्नेष्वर्थनियमः प्रज्ञातार्थापेक्षया वा प्रत्यय

पूर्वं कृतार्थत्वादित्यवधेयम्। अर्थवत् किम्। धनं वनमित्यादौ प्रतिवर्णं संज्ञा माभूत्। स्यादेतत्। विशिष्टरूपोपादानविषयतया अर्थवत्परिभाषाया इहाप्रवृत्तावपि अधातुरप्रत्यय इति पर्य्युदासादेव सिद्धम्। न चाधीते यावक

(अर्थवदधातुरप्रत्ययः प्रातिपदिकम् । १। २। ४५ ।)

न च प्रतीति । (कै)

क्रियावत्त्वाभावादिति भावः॥ ननूक्तरीत्या स्वाद्यनुत्पत्तौ कथं पदत्वनिबन्धनो नलोपोऽत आह

अयं भाव इति ॥ (कै)

उत्पन्नेष्विति । (कै)

उत्पन्नस्यापि लुगादिनैव निवृत्तिरित्यर्थः । एकस्मिन्नेवैकवचनमिति सामान्यापेक्षप्रत्ययनियमे कस्या अप्यनवस्थितेराह

सर्वे ("सर्वे तत्राढ्या" इति पाठोऽप्यस्ति) आढ्या भवन्ति सर्वे वा गोमन्तः। यथा लोक इत्युच्यते लोके चावयवा एवार्थवन्तो न समुदायाः। आतश्चावयाव एवार्थवन्तो न समुदाया यस्य हि ("यद्" इतप्यस्ति) तद्द्रव्यं भवति स तेन कार्य्यं करोति यस्य च ता ("या") गावः सन्ति स तासां क्षीरं घृतं चोपभुङ्क्तेऽन्यैरेतद्द्रष्टुमप्यशक्यम् ("द्रष्टुमशक्यम्" इत्यपि)। का तर्हीयं वाचो युक्तिराढ्यमिदं नगरं गोमदिदमिति। एषैषा वाचो युक्तिः। इह तावदाढ्यमिदं नगरमित्यकारो

नियम इति स्यादेव स्वाद्युत्पत्तिः। अव्ययादिवत्। यदुक्तं संघातस्यैकार्थ्यात् सुबभावो वर्णादिति तद्वर्णानामर्थवत्त्वापत्तेः। तत्र हि तस्यैवैकैव विभक्तिः। समुदायावयवार्थगतमेकत्वं प्रत्याययिष्यति। एकमेव हि तदेकत्वं तच्चैकेनैव हि सुपा प्रत्यायितमित्यवयवेभ्यो विभक्तिर्न स्यात्। अनर्थकस्य तु प्रातिपदिकसंज्ञायां प्रकाशयितव्यस्यार्थस्याभावात् समुदायादिव प्रतिवर्णं विभक्त्यु-

---

इत्यादौ इक्श्तिपौ निरर्थकावपि धातुप्रत्ययौ स्त इति वाच्यम्। अडादिव्यवस्थायै इक एवार्थवत्त्वस्वीकारात् स्वार्थिकानां च प्रकृत्यर्थेनार्थवत्त्वात्। न चेदं कल्पनामात्रमिति वाच्यम्। डित्थादावपि तथात्वात्। उक्तं हि।

अर्थनियम इति। (कै)

अनेकप्रकरणव्यवधानादेकवाक्यतापक्षो दुर्बल इत्यभिमानः॥ प्रत्ययनियमेऽपि न दोषः इत्याह

प्रकृतेति। (कै)

संनिहितेत्यर्थः॥ अवश्यमेवमाश्रयणीयमित्याह

अव्ययादिवेति॥ (कै)

मत्वर्थीयः। आज्या अस्मिन् सन्ति तदिदमाज्यमिति। गोमदिदमिति ("गोमदिदं नगरमिति" इति पाठोऽप्यन्ति) मत्वन्तान्मत्वर्थीयो लुप्यते॥ एवमपि वाक्यप्रतिषेधोऽर्थवत्त्वात्। वा। वाक्यस्य प्रातिपदिकसंज्ञायाः प्रतिषेधो वक्तव्यः। देवदत्त गामभ्याज शुक्लाम् देवदत्त गामभ्याज कृष्णामिति। किं कारणम्। अर्थवत्त्वात्। अर्थवद्ध्येतद्वाक्यं भवति॥ न वै पदार्थादन्यस्यार्थस्योपलब्धिर्भवति वाक्ये। पदार्थादन्यस्यानुपलब्धिरिति

त्पत्तिप्रसङ्गः॥ न लोप इति (भा)। विभक्तिस्तु अवश्यं न भवति समुदायस्य पृथक्प्रातिपदिकसंज्ञायां तदन्तर्भावाद् लुकोऽभावात् न लोपस्योपलक्षणार्थत्वाज्जश्त्वादीनामपि प्रसङ्गः॥ अहन्निति। भा। विशेषविहितत्वाल्लडाद्युत्पत्तौ सत्यामडागमस्य धातुभक्तत्वात् प्रातिपदिकसंज्ञायां सत्यां नलोपप्रसङ्गः। न चाप्रत्यय इति प्रत्ययलक्षणप्रतिषेधः। "नङिसम्बुद्ध्योरि"ति ज्ञापनाद् नलोपे विधीयमाने प्रत्ययलक्षणेनाप्रत्यय इति निषेधाभावात्'॥

अर्थवत्ता नोपपद्यते केवलेनावचनात् सिद्धं त्वन्वयव्यतिरेकाभ्यामिति। कल्पिताभ्यामिति हि तदर्थः। वस्तुतः पदस्फोटवाक्यस्फोटयोरेवार्थवत्त्वात्। सत्यम्। उत्तरार्थमर्थवद्ग्रहणं इह तु स्पष्टार्थम्। अधातुः किम्। अहन्। नलोपो माभूत्।

(अर्थवदधातुरप्रत्ययः प्रातिपदिकम् । १। २। ४५।)

यत्तूक्तमिति। (कै)

"हयवरट्" (शिवसू—५) सूत्रे इति शेषः ॥

प्रकाशयितव्यस्यार्थस्याभावादिति। (कै)

तदभावेऽपि प्रातिपदिकसंज्ञासामर्थ्यादित्यर्थः ॥

समुदायादिवेति। (कै)

अनर्थकनिपातरूपात् समुदायादिवेत्यर्थः। वस्तुतः संख्याकर्मादेरभावाद्विभक्तेरत्रानुत्पत्तिरेव। अर्थनियमादिप्रकारस्तु महासंज्ञाविरोधाद्गमके सत्येव न सर्वत्र। एतद्भावत्त्यं तु निरर्थकसमुदाय

चेत् पदार्थाभिसम्बन्धस्योपलब्धिः। वा। पदार्थादनस्यानुपलब्धिरिति चेदिदमुच्यते। पदार्थाभिसम्बन्धस्योपलब्धिर्भवति वाक्ये। इह देवदत्तइत्युक्ते कर्ता निर्दिष्टः कर्म क्रियागुणौ चानिर्दिष्टौ। गामित्युक्ते कर्मनिर्दिष्टं कर्ता क्रियागुणौ चानिर्दिष्टौ। अभ्याजेत्युक्ते क्रिया निर्दिष्टा कर्तृकर्मणी गुणश्चानिर्दिष्टः। शुक्लामित्युक्ते गुणो निर्दिष्टः कर्तृकर्मणी क्रिया चानिर्दिष्टा।

धातुग्रहणं करोतीति। भा। पुत्रीयतीत्यादौ प्रातिपदिकत्वादेव लुक् सिद्ध इति भावः॥ श्येनायत इति। भा। अत्राप्रत्यय इति निषिद्धा प्रातिपदिकसंज्ञा॥ कृत्तद्धितेति। भा। तद्धितग्रहणमत्रनियमार्थं कृद्ग्रहणं तु प्रतिषिद्धार्थम्॥ भिद् छिद् इति। भा। अत्र हि अधातुरिति प्रतिषेधप्रसङ्गः॥ अनेकपदप्रसङ्ग इति। भा। अनेकं पदमस्मिन्नित्यनेकपदः समुदायस्तस्य संज्ञाप्रसङ्ग इत्यर्थः॥ अनेकस्यापि पदस्येति। भा। समु-

---

न च "सुपोधातु"ति धातुग्रहणात् धातोर्नेयं संज्ञेति वाच्यम्। श्येनायत इत्यादौ प्रत्ययान्ते धातुग्रहणस्य चरितार्थत्वात्। अप्रत्ययः किम्। पचतीति तिपो माभूत्। सुपोऽप्येवम्। न चैवन्तद्न्तेषु अतिव्याप्तिताद्वस्थ्यम्।

इति बोध्यम् ॥ ननु सर्वसुबुत्पत्तौ तेषां श्रवणापत्तिः । सर्वैकवचनोत्पत्तावपि एवमेवात आह

विभक्तेस्तु इति ॥ (कै)

समुदायस्येति । (कै)

कृदन्तस्य अन्तरङ्गत्वादवयवसंज्ञा तन्निमित्तसुप्रवृत्तिकालोत्तरकाले इत्यर्थः । समासनियमस्त्वर्थवत्समुदायविषय इति भावः ॥ न च धनतीत्यादौ प्रतिवर्णं सुबुत्पत्तौ तच्छ्रवणप्रसङ्ग इति वाच्यम् । धातुप्रत्ययपदयोर्धात्ववयवप्रत्ययान्तावयवपरतया तत्र सर्वत्र वारणेनादोषात् तस्मात् अव्युत्पन्नप्रातिपदिकावयववर्णानां संज्ञैवाप्राप्ता तत्र च समुदायप्रातिपदिकावयवत्वेन तल्लोपो धनवनादिकमव्युत्पन्नमिति भावस्तद्ध्वनयन्नाह

इहेदानीं देवदत्त गामभ्याज शुक्लामित्युक्ते सर्वं निर्दिष्टं भवति ("भवति" इति नास्ति बहुषु पुस्तकेषु) देवदत्त एव कर्ता नान्यः । गौरेव ("गामेव" इति पाठोऽप्यस्ति) कर्म नान्यत् । अभ्याजिरेव क्रिया नान्या । शुक्लामेव न कृष्णामिति । एतेषां ("येषाम्" इति पाठोऽप्यस्ति) पदानां सामान्ये वर्तमानानां यद्विशेषेऽवस्थानं स वाक्यार्थः । तस्मात् प्रतिषेधः । वा । तस्मात् प्रतिषेधो

दितस्येति बोद्धव्यम् । प्रतिपदं तु नैव संज्ञा प्राप्नोत्यप्रत्यय इति निषेधात् समुदायस्य तु निषेधो न प्रवर्तते प्रत्ययग्रहणे यस्मात् स विहित इति वचनात् समुदायाच्च प्रत्ययस्याविधानात् प्रत्ययान्तत्वाभावात् । न विद्यते प्रत्ययो यस्मिन् सोऽयमप्रत्यय इत्यप्याश्रयितुं न युज्यते बहुपटव इत्यस्यापि

उत्तरसूत्रे तद्धितग्रहणस्य नियमार्थत्वात् । तद्धितान्तानामेव न त्वन्यप्रत्ययान्तानामिति । न च तत्रापि संज्ञाविधित्वेन तदन्तग्रहणं दुर्लभमिति वाच्यम् ।

(अर्थवदधातुरप्रत्ययः प्रातिपदिकम् । १। २। ४५ ।)

जश्त्वादीनामिति । (कै)

एतेन जश्त्वादौ धकाराद्युच्चारणं वैयर्थ्यमित्यपास्तम् ॥

विशेषेति । (कै)

अनवकाशत्वात् लुपं बाधित्वेति भावः ॥ न च श्येनायत इत्यादौ लडादयः सावकाशा इति अत्र परत्वाद् दुर्वारा एवं तर्हि "भूवादि" सूत्रस्य यल्लडादिविधावुपस्थानं तस्यानवकाशत्वादित्यर्थः ॥

अडागमस्येति । (कै)

अङ्गभक्तत्वेऽपि धातुरेवात्राङ्गमिति धातुभक्तत्वादित्युक्तम् । इदं च स्वरूपकथनम् ॥

वक्तव्यः ॥ न वक्तव्यः । अर्थवत् समुदायानां समासग्रहणं नियमार्थम् । वा । अर्थवत् समुदायानां समासग्रहणं नियमार्थं भविष्यति । समास एवार्थवतां समुदायानां प्रातिपदिकसंज्ञो भवति नान्ये इति ॥ यदि नियमः क्रियते प्रकृतिप्रत्ययसमुदायस्य प्रातिपदिकसंज्ञा न प्राप्नोति बहुपटवः (५ । ३ । ६८)। उच्चकैरिति (५। ३। ७१)। किं पुनरत्र प्रातिपदिकसंज्ञया

समुदायस्य निषेधप्रसङ्गात् स्वरे दोषप्रसङ्गात् ॥ समुदायोऽत्राऽनर्थक इति । भा । पदार्थानां समन्वयाभावात् ॥ अवयवार्थवत्त्वादिति । भा । अवयवधर्माणां च समुदाये व्यपदेशात् सति च प्रातिपदिकत्वे सुब्लुक्प्रसङ्गः ॥ एषैषेति । भा । एषा या वाचो युक्तिः सैषा एतत्प्रमाणेत्यर्थः ॥ अकारो मत्वर्थीय इति । भा । ततश्च नावयवधर्मेण समुदाये व्यपदेशः किं तर्हि

अर्थवदित्यनुवृत्तिसामर्थ्यात्तत्सिद्धिः । प्रशंसायां हि मतुप् । एकार्थीभावेन लौकिकप्रयोगे प्रसिद्धत्वं च प्रशंसार्थः । अधातुप्रत्ययाविति सिद्धे नञ् द्वयोपादानं स्पष्टार्थम् । महासंज्ञाकरणं प्राचामनुरोधात् ॥

न ङिसम्बुद्ध्योः इति। (कै)

कथमन्यथा राजेत्यादौ न लोपः। न च कृदन्तत्वात् सिद्धिः। तत्राप्यप्रत्यय इत्यनुवृत्तेरिति भावः॥

पुत्रीयतीति। (कै)

अप्रत्यय इति प्रत्ययस्यैव निषेध इत्यभिमानः॥ प्रत्ययान्तस्य स निषेध इत्यभिप्रायेणाह

अत्रापीति॥ (कै)

भाष्ये

प्रार्थ्यते। प्रातिपदिकादिति स्वाद्युत्पत्तिर्यथा स्यात् (४। १। १-२)। नैष दोषः। यथैवात्राप्रातिपदिकत्वात् स्वाद्युत्पत्तिर्न भवत्येवं लुगपि (२। ४। ७१) न भविष्यति। तत्र यैवासावन्तर्वर्त्तिनी विभक्तिस्तस्या एव श्रवणं भविष्यति। नैवं शक्यम्। स्वरे हि ("हि" इति नास्ति वङ्गपुस्तकेषु) दोषः स्यात्। बहुपटव इत्येवं स्वरः प्रसज्येत ("स्यात्" इति अत्र पाठोऽस्ति बङ्गपुस्तकेषु)। बहुपटव इति चेष्यते। पठिष्यति ह्याचार्यः। चितः स प्रकृतेर्बह्वकजर्थमिति। (चितः। ६। १। १६३। चितः स प्रकृतेर्बह्वकजर्थम्। वा। चितः स प्रकृतेरिति वक्तव्यम्। किं प्रयोजनम्। बह्वकजर्थम्। बह्व-

---

दण्ड्यादिवद्यौगिक इत्यर्थः॥ मत्वन्तादिति। भा। मत्वन्तान्मतुब् न भवति "सरूपः प्रत्ययो नेष्ट" इति (शैषिकान्मतुवर्थीयाच्छैषिको मतुवर्थिकः। सरूपः प्रत्ययो नेष्टः सन्नन्तान्न सनिष्यते ३। १। ७॥ ५। २। ६४॥) वचनात् तस्माद् "एकगोपूर्वाद्" इति ठञो भाष्यकारवचनप्रामाण्याल्लोपः। अत इति च तत्र निवृत्तम्। गौत्रिकादिसिद्ध्यर्थं गवां समूहो गोत्रा सास्मिन्नस्तीति गौत्रिकम्। अथवा मत्वन्तान्मत्वर्थीयो लुप्यत इति। अनेनावयवधर्मस्य समुदाये उपचारमाह। इह तु मुख्येऽर्थवत्त्वे सम्भवत्युपचरितत्वस्याश्रयो न

(अर्थवदधातुरप्रत्ययः प्रातिपदिकम्। १। २। ४५।)

काण्ड इति। (भा)

परादिवद्भावेन प्रत्ययान्तत्वमिति भावः। न च पर्य्युदासे शाब्दफलत्वाभायान्तवत्त्वस्यैव प्रवृत्तेस्तेनाप्रत्ययान्तत्वात् प्रातिपदिकत्वं स्यादेव तथा च ह्रस्वः स्यादिति वाच्यम्। भाष्यकृता वक्ष्यमाणत्वात्॥

अत्र हीति। (कै)

न च कृद्ग्रहणस्य प्रतिषेधबाधनार्थत्वे तद्धितग्रहणनियमात् कारकशब्दे प्रातिपदिकत्वानापत्तिः। कृद्ग्रहणं तु मध्येऽपवादन्यायेनाधातुरिति प्रतिषेधस्यैव बाधकं स्यादिति वाच्यम्। बाध्यसामान्यचिन्ताश्रयणादित्यभिमानः। वस्तुतो धातोः प्रत्ययान्तस्य च चेत् कृत्तद्धितान्तस्यैवेति नियमे भाष्यतात्पर्य्यम्। तेनाधातुग्रहणमपि प्रत्याख्यातं क्विबाद्यन्तस्यापि प्रत्ययान्तत्वात् प्रत्य-

---

र्थमकजर्थं च। वक्त्रर्थं तावत्। बहुभुक्तम्। बहुकृतम्। अकजर्थम्। सर्वकैः। विश्वकैः। उच्चकैः। नीचकैः। तत्तर्हि वक्तव्यम्। न वक्तव्यम्। मतुब्लोपोऽत्र द्रष्टव्यः। तद्यथा। पुष्पका एषां पुष्पकाः। कालका एषां कालकाः। अथवाकारो मत्वर्थीयः। तद्यथा। तुन्दः घाट इति पूर्वसूत्रनिर्देशस्य। चित्वात् चित इति॥) तस्यां पुनर्लुप्तायां यान्या विभक्तिरुत्पद्यते

युक्तः॥ अर्थवद्वाक्यमिदानीं दर्शयति। एवमपीति। भा॥ अर्थवद्धीति। भा। पदार्थानां समन्वयावगमात्॥ न वै पदार्थादिति। भा। पदानि संसमर्थं प्रतिपादयन्ति॥ वाक्यम्। पदार्था एव त्वाकाङ्क्षा योग्यता सन्निधिवशात् परस्परसंसृष्टो वाक्यार्थ इत्यर्थः। न तु वाक्यं वाक्यार्थो वा पृथगस्तीति

यान्तस्यैवेत्येव भाष्ये उक्तम्। न च अस्यापत्यम् इः इत्यादौ प्रत्ययत्वप्रयुक्तनिषेधबाधनार्थं तद्धितस्यैव संज्ञाविधानमस्त्विति वाच्यम्। तस्य निषेधे फलाभावात्। न च हरिस्त्वित्यादौ सोः प्रातिपदिकत्वापत्तिरेवं च औत्सर्गिकैकवचनापत्तिः "सात्पदाद्योः" (८। ३। १११) इति षत्वनिषेधापत्तिश्चेति वाच्यम्। औत्सर्गिकस्यापि विना गमकमप्रवृत्तेर्बहुव्रीहावनेकस्यापि पदस्येति भाष्यानुपपत्तेराह

समुदितस्येति। (कै)

अत एवानेकग्रहणं चरितार्थम्॥ बहुव्रीह्याश्रयणफलं दर्शयति

प्रतिपदं त्विति॥ (कै)

तस्याः प्रकृत्यनेकदेशत्वादन्तोदात्तत्वं न भविष्यति॥ एवं तर्ह्याचार्यप्रवृत्तिर्ज्ञापयति भवति प्रकृतिप्रत्ययसमुदायस्य प्रातिपदिकसंज्ञेति। यदयमप्रत्यय इति प्रतिषेधं शास्ति। स च तदन्तप्रतिषेधः। स तर्हि ज्ञापकार्थः प्रत्ययप्रतिषेधो वक्तव्यः। ननु चायं प्राप्त्यर्थोऽपि वक्तव्यः। नार्थः प्राप्त्यर्थेन। कृत्तद्धितग्रहणं नियमार्थं भविष्यति। कृत्तद्धितान्तस्यैव प्रत्ययान्तस्य प्रातिपदिकसंज्ञा भविष्यति नान्यस्य प्रत्ययान्तस्येति। स एषोऽनन्यार्थः प्रत्ययप्रतिषेधो वक्तव्यः प्रकृतिप्रत्ययसमुदायस्य वा प्रातिपदिकसंज्ञा वक्तव्या॥ उभयं

भावः॥ पदार्थाभिसम्बन्धस्येति। भा। ध्वनितव्यञ्ज्यं नित्यं वाक्यं विशिष्टस्यार्थस्य पदार्थसंसर्गरूपस्य वाचकम्। अन्यथा ह्यशाब्दो वाक्यार्थः स्यात्॥ कर्त्ता निर्दिष्ट इति। भा। सम्बोधनविषयमनियतक्रियं कर्तृमात्रमित्यर्थः॥ यद्विशेषेऽवस्थानमिति। भा। पदार्थसंसर्गरूपे वाक्यार्थे इत्यर्थः। अत एव वाक्यमेव मुख्यः शब्दो वाक्यार्थ एव मुख्यः शब्दार्थः। सादृश्यादन्वयव्यतिरेकौ कल्पितौ लाघवार्थमाश्रित्यपदार्थव्यवस्थापनं क्रियते। प्रतिवाक्यं व्युत्पत्त्य-

(अर्थवदधातुरप्रत्ययः प्रातिपदिकम् । १। २। ४५ ।)

प्रत्ययान्तत्वाभावादिति । (कै)

“संज्ञाविधावि”ति निषेधस्तु नात्र। यत्र प्रत्ययस्य संज्ञा तत्रैव तन्निषेधप्रवृत्तेरिति भावः॥

स्वरे दोषेति । (कै)

अनुपदमेव स्फुटी भविष्यत्येतत्॥

समन्वयेति । (कै)

स एव हि वाक्यशक्यः॥

न वक्तव्यम्। तुल्यजातीयस्य नियमः। कश्च तुल्यजातीयः। यथा जातीयकानां समासः। कथं जातीयकानां समासः। सुबन्तानाम्॥ सुप्तिङ्समुदायस्य तर्हि प्रातिपदिकसंज्ञा प्राप्नोति। सुप्तिङ्समुदायस्य (“अपि” इति पाठोऽप्यस्ति) प्रातिपदिकसंज्ञारभ्यते। जहि कर्मणा बहुलमाभीक्ष्ण्ये कर्तारं चाभिदधातीति (२।१।७२ गणसूत्रम्)। तन्नियमार्थं भविष्यति। एतस्यैव सुप्तिङ्समुदायस्य प्रातिपदिकसंज्ञा भवति नान्यस्येति॥ तिङ्समुदायस्य तर्हि प्रातिपदिकसंज्ञा प्राप्नोति। तिङ्समुदायस्यापि प्रातिपदिकसंज्ञारभ्यते। आख्यातमाख्यातेन क्रियासातत्य इति (२।१।७२ गणसूत्रम्)। तन्निय-

---

सम्भवात् शाब्दव्यवहाराभावप्रसङ्गात्॥ बहुपटव इति। भा। द्योत्येनार्थेनार्थवान् प्रत्ययः। प्रकृतिस्तु वाच्येनेत्यर्थवत्समुदायोऽयं भवति॥ उच्चकैरिति। भा। तन्मध्यपतितस्तद्ग्रहणेन गृह्यते इति यदा नाश्रीयते नाप्यकच् स्वम्वत इति तदायं दोषः। तदा हि सुबन्तस्याकचि कृते “अव्ययादि”ति सुब्लुगभावात् “सुपो धातुप्रातिपदिकयोरि”ति लुगिष्यते स च न प्राप्नोति॥ किं पुनरत्रेति। भा। उच्चकैरित्याद्यन्यथा सिध्यतीति प्रश्नः॥ इतरो बहुपटव इति न सिध्यतीति मन्यमान आह प्रातिपदिकादिति स्वर इति।

अवयवधर्माणामिति । (कै)

यथा ग्रामो दग्ध इत्यादौ ॥ वीप्साया निष्प्रयोजनत्वादाह

एषा येति । (कै)

नैवात्र वीप्सेति भावः ॥

मतुप् नेति । (कै)

इदमेव ध्वनयितुं भाष्ये "मत्वर्थीय" इति उक्तम् । मतुबिति नोक्तम् ॥ लुग्विधायकाभावादाह

भाष्यकारेति ॥ (कै)

ननु अत इत्यनुवृत्तेरस्मादञ् दुर्लभोऽत आह

अत इतीति । (कै)

गोत्र इत्यत्र "इनित्र कट्यचश्च" (४ । २ । ५१) इति 'त्रः'॥ एकपूर्वसाहचर्य्याद् गोपूर्वस्यापि समासस्यैव तत्र ग्रहणमिति मते आह

मार्थं भविष्यति । एतस्यैव तिङ्समुदायस्य प्रातिपदिकसंज्ञा भवति नान्यस्येति ॥ अर्थवत्ता नोपपद्यते केवलेनावचनात् । वा । अर्थवत्ता नोपपद्यते वृक्षशब्दस्य । किं कारणम् । केवलेनावचनात् । न केवलेन वृक्षशब्देनार्थो गम्यते । केन तर्हि । सप्रत्ययकेन ॥ न वा प्रत्ययेन नित्यसम्बन्धात् केवल-

---

भा। बहुपटव इति वकाराकारस्योदात्तत्वं प्राप्नोति टकाराकारस्य चेष्यते ॥ प्रकृत्यनेकदेशत्वादिति । भा । न ह्यसौ प्रकृतेरेकदेश इत्यर्थः । अप्रत्यय इति प्रतिषेधं शास्त्रीत्यक्ते कश्च न ब्रूयाद् बहुपटव इत्यत्राप्रत्यय इति

(अर्थवदधातुरप्रत्ययः प्रातिपदिकम् । १। २। ४५।)

आदीति। (कै)

आदिना गोशकटिप्रकृतिकगौशकटिकस्य ग्रहणम् ॥

अथवेति। (कै)

गम्यमानार्थस्य निवृत्तिरेव वादिलोप इतिवल्लोपशब्देनोक्तेति भावः॥ परे तु एषा व्याख्या न भाष्यमरससिद्धा। अवयवार्थवत्त्वेन समुदायार्थवत्त्वाभावं प्रक्रम्यैतदुक्तेः। तस्माद् अर्श आद्यचस्तत्प्रामाण्याद् "गुणवचनेभ्य" इति मत्वर्थीयलोप इति सारं ग्रामो दग्ध इत्यादावपि अर्श आद्यजेव। अवयवेनासमुदायरूपाद् रूप इति भाष्यतात्पर्य्यम्॥ भाष्ये "अर्थवद्धेतद्वाक्यम्" इति पाठः॥ नन्वन्वयरूपोऽर्थः पदार्थातिरिक्त उपलभ्यतेऽत आह

पदानीति। (कै)

"पदार्था एव तु" इत्यनेन संसर्गबोधे पदानां व्यापारो नास्तीति। एवं च पदार्थैरिवाकाङ्क्षादिभिः संसर्गस्य गम्यमानत्वान्न तत्र वाक्यशक्तिर्वाक्यस्यातिरिक्तस्याभावाच्च। तदाह

स्याप्रयोगः। वा। न वैष दोषः। किं कारणम्। प्रत्ययेन नित्यसम्बन्धात्। नित्यसम्बन्धावेतौ अर्थौ प्रकृतिः प्रत्यय इति। प्रत्ययेन नित्यसम्बन्धात् केवलस्य प्रयोगो न भविष्यति॥ अन्यद्भवान् पृष्टोऽन्यदाचष्टे। आम्रान्पृष्टः कोविदारानाचष्टे। अर्थवत्ता नोपपद्यते केवलेनावचनादिति भवानस्माभि·

निषेधः प्राप्नोतीत्यत आह स च तदन्तप्रतिषेध इति प्रत्ययग्रहणे यस्मात् स विहित इति तदन्तविधिः। संज्ञाविधौ च प्रत्ययग्रहणे तदन्तविधिः। संज्ञाविधौ च प्रत्ययग्रहणे तदन्तविधिर्निवारितः। अप्रत्यय इत्ययं तु प्रतिषेधविधिः। पटुशब्दाद्यात्र जसुत्पन्नो न बहुपटुशब्दादिति बहुपटव इत्येत-

न तु वाक्यमिति ॥ (कै)

वाक्यार्थो वेति। (कै)

संसर्गस्य पदार्थबोध्यत्वादिति भावः ॥ ननु पदातिरिक्तवाक्याभावात् कस्य पदार्थाभिसम्बन्धो वाच्यः स्यादत आह

ध्वनिव्यङ्ग्यमिति। (कै)

अनेन स्थिरत्वं तस्य दर्शितम् ॥

विशिष्टस्यार्थस्येति। (कै)

विशेषणत्वादिविशिष्टस्येत्यर्थः ॥ पदार्थानां संसर्गबोधकत्व दोषमाह

अन्यथेति। (कै)

न च शब्दप्रयोज्यत्वाच्छाब्दत्वं प्रत्यक्षदृष्टधूमबोध्यवह्नेरपि प्रत्यक्षत्वात् पक्षे श्रुतधूमशब्दोपस्थितधूमार्थबोध्यवह्नेरपि शाब्दत्वापत्तेश्च।

स्योदितः केवलस्याप्रयोगे हेतुमाह। एवं च किल नाम कृत्वा चोद्यते समुदायस्यार्थे प्रयोगादवयवानामप्रसिद्धिरिति ॥ सिद्धं त्वन्वयव्यतिरेकाभ्याम्। वा। सिद्धमेतत्। कथम्। अन्वयाद्व्यतिरेकाच्च। कोऽसावन्वयो व्यतिरेको वा। इह वृक्ष इत्युक्ते कश्चिच्छब्दः श्रूयते वृक्षशब्दोऽकारान्तः

दप्रत्ययान्तमेव। अथवा अप्रत्यय इति बहुव्रीह्याश्रयणात् प्रत्ययादेरपि बहुपटव इत्यस्य निषेधः प्राप्नोतीत्याह स चेति। भा। अप्रत्यय इति तत्पुरुषः आश्रीयते तस्य स्वपदार्थप्रधानत्वेनान्तरङ्गत्वादिति भावः॥ प्राप्त्यर्थ इति। भा। प्रतिषेधः प्राप्त्यर्थ इत्यर्थः॥ स एषोऽनन्यार्थ इति। भा। ज्ञाप-

यदि तु पदसमभिव्याहाररूपाकाङ्क्षा तत्कारणत्वज्ञानं च शाब्दबोधे कारणमिति शाब्दत्वं पदानां पदार्थेष्वपि शक्तिर्न सिध्येत । तदुक्तम् "अशब्दो यदि वाक्यार्थः पदार्थोऽपि तथा भवेद्" इति । यदि बोधजनकताया असम्बद्धेव वक्तुमशक्यतया पदार्थैः पदानां शक्तिरूपसम्बन्धकल्पनं तदा समभिव्याहारे संसर्गबोधकारणताया अपि असम्बद्धेव वक्तुमशक्यतया तेन तादात्म्यसम्बन्धस्य वाक्ये आवश्यकत्वात् । तादात्म्यमेव च शक्तिरिति तत्त्वम् ॥ पदार्थातिरिक्तः कश्चिद्वाक्यार्थोऽस्तीति वक्तुमुपक्रमते भाष्ये

इह (भा)

इत्यादि ॥ ननुकर्त्तृत्वस्य क्रियानिरूपितत्वात् क्रियायाश्चासन्निधानात् तत्त्वाभावेन कर्त्तेत्यनुपपन्नमत आह

कर्त्तृमात्रमिति । (कै)

प्रधानीभूतधात्वर्थमात्राश्रय इत्यर्थः । एवं कर्मशब्देन धात्वर्थफलमात्राश्रयः ॥

सकारान्तश्च प्रत्ययः । अर्थोऽपि कश्चिद्गम्यते मूलस्कन्धफलपलाशवानेकत्वं च । वृक्षावित्युक्ते कश्चिच्छब्दो हीयते कश्चिदुपजायते कश्चिदन्वयी । सकारो हीयते औकार उपजायते वृक्षशब्दोऽकारान्तोऽन्वयी । अर्थोऽपि कश्चिद्धीयते कश्चिदुपजायते कश्चिदन्वयी । एकत्वं हीयते द्वित्वमुपजायते मूल-

---

नार्थ एवेत्यर्थः ॥ सुबन्तानामिति । भा । एतच्चोपलक्षणं भेदसंसर्गद्वारकार्यवत्त्वयुक्तानाम् । यस्मात् सुबन्तानामपि समासो दृश्यते । अश्वक्रीतीत्यादौ "गतिकारकोपपदानां कृद्भिः सह समासवचनं प्राक् सुबुत्पत्तेः" इति

अनिर्दिष्टाविति । (भा)

पूर्वत्र विभक्तिविपरिणामेनान्वयः। ईदृशप्रकारोऽपि भाष्यप्रामाण्याद्युक्त एव तृतीयस्थले "अनिर्दिष्ट" इत्येव पाठः॥

देवदत्त एव कर्त्ता नान्यः इति । (भा)

अनेनैतद्दर्शयति यत्किञ्चित्कारकस्य क्रियायाश्चोच्चारणे सर्वक्रियाणां योग्यानां सर्वकारकाणां च योग्यानामाक्षेपो भवति। एवं च सर्वत्र वाक्यमेव बोधकं तत्तदुपादानं तु नियमायेति॥

गामेव नान्यदिति । (भा)

गामिति शब्दवाच्यमेव कर्म नान्यदित्यादिक्रमेणार्थः॥ भाष्ये

सामान्ये । (भा)

सामान्यतः क्रियाकर्तृत्वादिविशिष्टे॥

स्कन्धफलपलाशवानन्वयी। ते मन्यामहे यः शब्दो हीयते तस्यासावर्थो योऽर्थो हीयते यः शब्द उपजायते तस्यासावर्थो योऽर्थ उपजायते यः शब्दोऽन्वयी तस्यासावर्थो योऽर्थोऽन्वयी॥ विषम उपन्यासः। बहवो हि शब्दा एकार्था भवन्ति। तद्यथा। इन्द्रः शक्रः पुरुहूतः पुरन्दरः। कन्दुः

वचनात्। देवदत्तो ग्रामं गत इत्यादेः सुबन्तसमुदायस्यैव वाक्यस्य नियमेन निवृत्तिः स्यादित्यभिप्रायेणाह सुप्तिङ समुदायस्येति। भा॥ जह्हिकर्मणेति। भा। ननु समाससंज्ञेयं समासान्तोदात्तार्था। नैष दोषः। समासत्वादेव प्रातिपदिकत्वमिति तत्तुल्यजातीयताप्रतिपादनार्थमेतदुपन्यस्तम्॥ तिङ्समुदायस्येति। भा। पश्य धावतीत्यादि। ततश्च प्रातिपदि-

(अर्थवदधातुरप्रत्ययः प्रातिपदिकम् । १। २। ४५।)

विशेषे (भा)

विशेषणविशेष्यभावापन्ने ॥ तदाह

संसर्गरूपे (कै)

इत्यादि। विशेषणविशेष्यभावरूपसंसर्ग इत्यर्थः। स एव वाक्यशक्य इति निरूपितं मञ्जूषायाम् ॥

अत एवेति। (कै)

तेनैव लौकिकवैदिकव्यवहारादित्यर्थः॥ नन्वेवं पदार्थव्यवहारोऽसङ्गतः स्यादत आह

सादृश्यादिति। (कै)

लाघवार्थं कल्पितान्वयव्यतिरेकावाश्रित्य सादृश्यात् पदपदार्थव्यवस्थेत्यन्वयः। यथा वर्णेष्वारोपिता उदात्तादयो व्यञ्जकध्वनिधर्मा व्यवहारे हेतव एवमिहापि काल्पनिकः पदपदार्थविभागस्तथेति भावः॥ ननु तादृशकल्पना व्यर्थेत्यत आह

कोष्ठः कुसूलः इति। एकस्य शब्दो बह्वर्थः। तद्यथा अक्षाः पादा माषा इति। अतः किं न साधीयो अर्थवत्ता सिद्धा भवति। न ब्रूमोऽर्थवत्ता न सिद्ध्यतीति। वर्णितार्थवत्तान्वयव्यतिरेकाभ्यामेव। तत्र कुत एतदयं प्रकृत्यर्थोऽयं प्रत्ययार्थ इति न पुनः प्रकृतिरेवोभावर्थौ ब्रूयात् प्रत्यय एव वा।

कान्तोदात्तत्वप्रसङ्गः॥ व्याख्यातमिति॥ भा। ततश्च समासेन तुल्यजातीयानां सर्वेषां वाक्यानां नियमान्निवृत्तिः सिद्धेत्यर्थः॥ अर्थवत्तेति। भा। अर्थवत्तासंज्ञानिमित्तत्वेनेहोपात्ता सा च वाक्यस्यैव पदस्य वा केवलस्य लोके प्रयुज्यमानस्योपपद्यते न तु प्रकृतिभागस्य केवलस्य प्रयोगाभावादर्थवद-

प्रतिवाक्यमिति ॥ (कै)

ननु वङ्कजादीनां स्वार्थिकत्वेनार्थवत्त्वं नेत्यर्थवत्समुदायत्वमस्मिन् कथमत आह

द्योत्येनेति ॥ (कै)

ननु तन्मध्यपतितन्यायेनाकजसम्भवतः [१]सर्वनामाव्ययविधौ इति "येन विधिः" इति सूत्रस्थवचनेन चाव्ययत्वात् लुक् सिद्ध इति किमत्र प्रातिपदिकत्वेन अत आह

तन्मध्येति ॥ (कै)

तदा हीति । (कै)

तन्मध्यपतित इत्यादिन्यायाभावे इत्यर्थः । अन्तरङ्गत्वात् लुक्त्वाच्च पूर्वमेवाकचो"ऽव्ययाद्" इति सूत्र् लुक् कुतो नेति चिन्त्यं वङ्कपटव उच्चकैर्नीचकैरिति वाक्ये वङ्कपटव इत्युदाहरणं 'किं पुनः' इति प्रश्नाशयस्तु 'यथैव' इत्यादिना वच्यमाण इत्यन्ये ॥

---

१ सर्वनामाव्ययधातुविधौ । इ ॥

सामान्यशब्दा एत एवं स्युः । सामान्यशब्दाश्च नान्तरेण विशेषं प्रकरणं वा विशेषेष्ववतिष्ठन्ते । यतस्तु खलु नियोगतो वृत्त इत्युक्ते स्वभावतः कस्मिंश्चिदर्थे प्रतीतिरुपजायतेऽतो मन्यामहे नेमे सामान्यशब्दा इति । न चेत् सामान्यशब्दाः प्रकृतिः प्रकृत्यर्थे वर्तते प्रत्ययः प्रत्ययार्थे ॥ किं पुनरिमे

व्यवहार्यत्वात् ॥ न वेति । भा । अन्यथा सिद्धः केवलस्याप्रयोगः । "न केवला प्रकृतिः प्रयोक्तव्या न च केवलः प्रत्यय" इति "परश्चे"ति (३ । १ । २) सूत्रज्ञापितनियमात् । अर्थवत्तात्वन्वयव्यतिरेकाभ्यामस्येवेति भावः । अन्वयव्यतिरेकाभ्यामिति । भा । अन्वयोऽनुगमः सति शब्देऽर्थावगमः ।

(अर्थवदधातुरप्रत्ययः प्रातिपदिकम् । १। २। ४५ ।)

अन्यथा सिध्यतीति । (कै)

तन्मध्ये पतितादिन्यायेनेति भावः ॥

टकाराकारस्येति । (कै)

प्रातिपदिकत्वे सति अन्तरङ्गानपीति न्यायेन लुकिकृते टुशब्दोकारस्यैव स्वरप्रवृत्तिरिति भावः ॥

न ह्यसाविति । (कै)

समुदायादुत्पत्तेरिति भावः ॥

अप्रत्यय इति प्रतिषेधः प्राप्नोतीति । (कै)

जसमाश्रित्येति भावः ॥

प्रतिषेधेति । (कै)

पर्युदासेऽपि प्रत्ययस्य संज्ञित्वाभावान्न दोष इति भावः ॥

बहुव्रीहीति । (कै)

न विद्यते प्रत्ययो [१]यस्मिन्नित्यर्थः ॥

---

१ यस्मिन्नितीत्यर्थः । इ ॥

वर्णा अर्थवन्तः आहोस्विदनर्थकाः । वर्णस्यार्थवदनर्थकत्व उक्तम् । वा । किमुक्तम् । अर्थवन्तो वर्णा धातुप्रातिपदिकप्रत्ययनिपातानामेकवर्णानामर्थदर्शनाद् (शिवसू-वा-५) वर्णव्यत्यये चार्थान्तरगमनाद्वर्णानुपलब्धौ चानर्थगतः संघातार्थवत्त्वाच्च । संघातस्यैकार्थ्यात् सुबभावो वर्णात् । अनर्थ-

---

व्यतिरेकः शब्दाभावे तदर्थानवगमः ॥ विषम इति । भा । यद्येकः शब्दः एकस्मिन्नर्थे नियतः स्यात् तत एतद्युज्यते वक्तुं यतस्त्वनियतः ततः प्रकृतेरेव सर्वेऽर्थाः स्युः । यथा दधिमध्वग्निचिदिति । प्रत्ययस्तु क्वचिद्द्योतकः ।

भेदसंसर्गेति। (कै)

[1]पदार्थयोर्विभागेनापि प्रयोगे इतरसंसर्गाकाङ्क्ष्यभेदसंसर्गः सद्वारभूतो यस्य विशिष्टार्थवत्त्वस्य तद्युक्तानामित्यर्थः। समासेऽपि वाक्यीयेनैव तेन विशिष्टार्थवत्त्वं न हि प्रकृतिप्रत्यययोर्विभागः परस्येति वचनादिति भावः। एवं च [2]समुदायघटका भागाः स्वातन्त्र्येणापि प्रयोगार्हा अर्थवन्तो गृह्यन्ते इति तात्पर्य्यम्॥ उपलक्षणत्वेन व्याख्याने वीजमाह

यस्मादिति॥ (कै)

अश्वक्रीतीति। (कै)

सुबन्तेन समासे तु अन्तरङ्गत्वात् टापि ङीबेव नस्यादित्यर्थः॥ सुबन्तानामित्यस्योपलक्षणत्वमजानानस्योद्यतीत्याह

---

१ "वाक्ये"इत्यधिकम्। इ॥ २ समुदायघटकभागाः। इ॥

कास्तु प्रतिवर्णमर्थानुपलब्धेः (शिवसू-वा-५) वर्णव्यत्ययापायोपजनविकारेष्वर्थदर्शनादिति (शिवसू-वा ५)॥ तत्रेदमपरिहृतं संघातार्थवत्त्वाच्चेति। तस्य परिहारः। संघातार्थवत्त्वाच्चेति चेद्दृष्टो ह्यतदर्थेन गुणेन गुणिनोऽर्थभावः। वा। संघातार्थवत्त्वाच्चेति चेद्दृश्यते हि पुनरतदर्थेन गुणेन

प्रत्ययस्यैव वा सर्वे ह्यर्थाः स्युः। इयानधुनेति यथा। प्रकृतिस्त्वर्थाभिधाने साहायकमात्रं कुर्य्यात्। अतः किं न साधीय इति। भा। प्रकृतिः सर्वानर्थानभिदधाति। द्योतकास्तु विभक्तय इति सिद्धैवार्थवत्ता॥ प्रत्यय एवेति। भा। ततश्च प्रकृतेरर्थवत्ता न सिध्यतीति तदवस्थो दोष इत्यर्थः॥

(अर्थवदधातुरप्रत्ययः प्रातिपदिकम्। १। २। ४५।)

देवदत्तविति॥ (कै)

ननु सुप्तिङ् समुदायस्य प्रातिपदिकसंज्ञेत्ययुक्तं तेनोन्तोदात्तस्वरस्यापि सिध्यर्थं समाससंज्ञाया एव विधानादिति शङ्किते

नन्विति॥ (कै)

समासत्वादेवेति। (कै)

समासमूलकार्थवत्त्वादेव प्रातिपदिकत्वमिति सुप् तिङ् समुदायस्यापि समासतुल्यजातीयता प्रतिपादनाय "जह्विकर्मणा" इत्येतदुपन्यस्तमित्यर्थः। एवं च भाष्ये

प्रातिपदिकसंज्ञारभ्यत (भा)

इत्यस्य तन्मूलभूतासमाससंज्ञारभ्यत इत्यर्थः इति तात्पर्य्यम्॥ तिङन्तस्यासत्त्ववाचित्वेन संख्याकारकाद्यभावात् विभक्त्यनुत्पत्तेः प्रातिपदिकस्य फलाभावोऽत आह

गुणिनोऽर्थभावः। तद्यथा। एकस्तन्तुस्त्वक्त्राणेऽसमर्थस्तत्समुदायश्च कम्बलः समर्थः। एकश्च तण्डुलः क्षुत्प्रतिघातेऽसमर्थस्तत्समुदायश्च वर्धितकं समर्थम्। एकश्च बल्वजो बन्धनेऽसमर्थस्तत्समुदायश्च रज्जुः समर्था भवति॥ विषम उपन्यासः। भवति हि तत्र या च यावती चार्थमात्रा। भवति हि किञ्चित्प्रत्येकस्तन्तुस्त्वक्त्राणे समर्थ एकश्च तण्डुलः क्षुत्प्रतिघाते समर्थ एकश्च

सामान्यशब्दा इति। भा। प्रकृतिश्चेत् सर्वानर्थानभिदध्यात् वृक्ष इत्युक्ते सर्वा संख्या प्रतीयेत। प्रत्ययो वा सर्वस्य प्रातिपदिकस्यार्थं प्रत्याययेदित्यर्थः॥ यतस्तु खल्विति। भा। प्रकरणादिना विनैवेति भावः॥ अतदर्थेनेति। भा। अतत्प्रयोजनेनेत्यर्थः॥ गुणेनेति। भा। अवयवेन। स

ततश्चेति ॥ (कै)

"समासश्चे"ति सूत्रं तु परमसर्वं इत्यादौ "स्वाङ्गस्फिटाम्" इत्यादेः प्राप्तस्य बाधाय स्यादिति तात्पर्य्यम् ॥

तुल्यजातीयानामिति । (कै)

तत्त्वं च प्रयोगार्हस्वतन्त्रार्थवत् समुदायत्वेनेत्याहुः॥ वार्त्तिकद्वयेनायमेवार्थ उपलक्ष्यत इति बोध्यम् ॥ प्रकृतिभागस्यार्थवत्त्वे किं केवलस्य प्रयोग आपाद्यते उत तत्र प्रमाणं नास्तीत्युच्यते इति विकल्पे नाद्य इत्याह

अन्यथेति ॥ (कै)

द्वितीये आह

अर्थवत्ता त्विति ॥ (कै)

भाष्ये

नित्यसम्बन्धाविति । (भा)

मायेश्वरवदिति भावः ॥

वल्वजो बन्धने समर्थः। इमे पुनर्वर्णा अत्यन्तायैवानर्थकाः॥ यथा तर्हि रथाङ्गानि विहृतानि प्रत्येकं व्रजिक्रियां प्रत्यसमर्थानि भवन्ति तत्समुदायश्च रथः समर्थ एवमेषां वर्णानां समुदाया अर्थवन्तोऽवयवा अनर्थका इति ॥ निपातस्यानर्थकस्य प्रातिपदिकत्वम् । वा । निपातस्यानर्थकस्य प्रातिपदिक-

---

ह्यवयविन उपकारकत्वाद् गुणः। अवयवी तु गुणी ॥ अर्थभावः (भा) प्रयोजनोत्पत्तिः ॥ बल्वजः (भा) तृणविशेषः ॥ या च यावती चेति । भा । अयं समुदाय काचिदित्यस्यार्थे वर्त्तते ॥ विहृतानीति । भा । विच्छिन्नानीत्यर्थः ॥ अनर्थकस्येति । भा । निपातानां द्योतकत्वादभिधेयार्थाभावेऽपि

(अर्थवदधातुरप्रत्ययः प्रातिपदिकम् । १। २। ४५।)

अवयवानामप्रसिद्धिरिति । (भा)

अवयवमात्रार्थगत्यभावेऽवयवानामर्थवत्त्वे हेतोरप्रसिद्धिरित्यर्थः। लोके केवलप्रकृत्यादेरप्रयोगेऽपि तान्त्रिककल्पितावन्वयव्यतिरेकौ दर्शयति

इह (भा)

इत्यादिना । एवं कल्पितान्वयव्यतिरेकाभ्यां प्रकृतिप्रत्ययविभागं तयोरर्थवत्त्वं च परिकल्प्य शास्त्रेऽन्वाख्यानमिति भावः । अत एव पूर्वप्रश्नः "कोसौ" इति लोकसिद्धत्वे हि प्रश्नासंगतिरिति बोध्यम् । अन्वयव्यतिरेकाभ्यां प्रकृतिप्रत्ययोरर्थवत्त्वोपपादनस्यानैकान्तिकत्व-मिह भाष्ये उक्तं वैषम्यं तथा हि ताभ्यां नार्थसिद्धिः। अध्यागच्छतीत्यादौ निपातेषु व्यभिचारात् [१]तत्सत्त्वेऽपि तदर्था-प्रतीतेः। तद्व्यतिरेकेऽप्यागच्छतीत्येतन्मात्रादर्थप्रतीतेश्च । एवं च

---

१ तत्सत्त्वे तदर्थाप्रतीतेः । इ ॥

संज्ञा वक्तव्या । खञ्जति निखञ्जति । लम्बते प्रलम्बते ॥ किं पुनरत्र प्राति-पदिकसंज्ञया प्रार्थ्यते । प्रातिपदिकादिति स्वाद्युत्पत्तिः (४ । १ । १-२) सुबन्तं पदमिति पदसंज्ञा (१ । ४ । १४) पदस्य पदात् (८ । १ । १६-१७) इति निघातो यथा स्यात् (८ । १ । २८) ॥ नैतदस्ति प्रयोजनम् । सत्या-

---

द्योत्यार्थसद्भावाद्येषामर्थवत्त्वं तेषां सिध्यत्येव संज्ञा । यस्य तु द्योत्योऽप्यर्थो नास्ति तदर्थं वचनम् ॥ निघातो यथा स्यादिति । भा । अर्थवदनर्थकयो-रसत्यपि सामर्थ्ये संज्ञाविधानसामर्थ्यान्निघातो भवतीत्येके । समानवाक्य-तानिमित्तो निघातो न सामर्थ्यनिमित्तः स चेहास्ति आख्यातं साव्यय-

प्रकृतिप्रत्ययान्यतरस्यैव सर्वार्थतास्तु। अन्यतरस्य साधुत्वमात्रार्थत्वमस्तु। अन्यायो नेकार्थत्वमिति त्वप्रयोजकमक्षादिषु दर्शनात्। बहुपर्य्यायदर्शनादन्यायोऽनेकशब्दत्वमितिवदित्याशयेन प्रकृतिप्रत्यययोरर्थवत्ताया अनैयत्यं दर्शयति

यद्येक इति॥ (कै)

यतस्त्विति। (कै)

एवं च अक्षादिशब्दे [1]तस्मिन् शब्दे सत्येव तदर्थाप्रतीतेरर्थान्तरप्रतीतेः। पर्य्यायस्थले तस्मिन्शब्देऽसत्यपि तदर्थप्रतीतेश्चेदृशावन्वयव्यतिरेका च निर्णायकाविति भावः। यदि प्रकृतिरेव संख्यावाचिका तर्हि क्वापि विभक्तिर्न प्रयुज्येतेत्यत आह

प्रत्ययस्त्विति। (कै)

इदम ईशि यस्येति लोपे इयान्॥

---

१ तस्मिन प्रयेन प्रकृतिप्रतीतेः – । इ॥

मपि प्रातिपदिकसंज्ञायां स्वाद्युत्पत्तिर्न प्राप्नोति। किं कारणम्। न हि प्रातिपदिकसंज्ञायामेव स्वाद्युत्पत्तिः प्रतिबद्धा। किं तर्हि। एकत्वादिष्वर्थेषु स्वादयो विधीयन्ते (१।४।२१-२२) न चैषामेकत्वादयः सन्ति॥ नैष दोषः। अविशेषेणोत्पद्यन्ते उत्पन्नानां नियमः क्रियते॥ अथवा प्रकृता-

---

कारकविशेषणम् वाक्यमिति परिभाषणाद्वाक्यस्येत्यपरे॥ न ह्रीति। भा। स्वादिविधिवाक्यस्य संख्याविधिवाक्येनैकवाक्यत्वात्॥ अविशेषेणेति। भा। नानावाक्यताश्रयणात्। नियमस्त्वार्थानां न प्रत्ययानां इत्यनर्थकेभ्योऽपि ते भवन्ति॥ अथवेति। भा। प्रत्ययनियमेऽपि दोषाभाव इत्यर्थः॥ अधिपरी

(अर्थवदधातुरप्रत्ययः प्रातिपदिकम् । १। २। ४५।)

अधुनेति। (कै)

इदमोऽधुनाप्रत्यय इति पक्षे इदम् शङ्कितुराशयम्। तदज्ञ सा ज्ञातुं पृच्छति भाष्ये

अतः किमिति ॥ (भा)

उक्तेन बहवः शब्दा इत्यादिना ग्रन्थेन किं साधितं त्वयेति भावः ॥ इतरः स्वाशयमाह

न साधीय इति ॥ (भा)

तदेवाह

न पुनरिति। (भा)

अन्यतरद् द्योतकमिति भावः ॥ तद्व्याचष्टे

प्रकृतिः (भा)

इत्यादिना ॥

सिद्धैवेति। (कै)

किन्तु विपरीतं प्राप्नोतीति भावः ॥ तदाह

नर्थानपेक्ष्य नियमः। के च प्रकृताः। एकत्वादयः। एकस्मिन्नेवार्थ एकवचनं न द्वयोर्न बहुषु। द्वयोरेवार्थयोर्द्विवचनं नैकस्मिन् बहुषु। बहुष्वेवार्थेषु बहुवचनं नैकस्मिन् द्वयोरिति ॥ अथवाचार्य्यप्रवृत्तिर्ज्ञापयति अनर्थकानामप्येतेषां भवत्यर्थवत् कृतमिति यदयमधिपरी अनर्थकौ (१। ४।

इति। भा। क्रियायोगे गत्युपसर्गसंज्ञयोर्विधानादनर्थकयोः क्रियायोगाभावात् प्राप्तिरेव नास्तीति संज्ञाविधानं यथोक्तार्थस्य ज्ञापकं सम्पद्यते। आनर्थक्यं च निपातस्य धातुनिपातयोः साधारणार्थतयाऽधिकद्योत्यार्थाभावादुच्यते। न तु सर्वात्मनार्थाभावात् ॥ तिबेकादेश इति। भा। तिपस्ति-

ततश्चेति । (कै)

एवं च प्रकृतेरर्थवत्त्वाभावात् संज्ञा न स्यादिति भावः ॥ परिहरति

सामान्यशब्दा इति । (भा)

एवं सत्येते सामान्यशब्दाः स्युस्तत्त्वं चैषां न दृश्यते इति भावः । तदुपपादयति

प्रकृतिश्चेद् (कै)

इत्यादिना ॥

वृक्ष इत्युक्ते (कै)

इत्यस्य प्रातिपदिकप्रयोगमात्रे तात्पर्य्यम् ॥ सामान्यशब्दाः कीदृशा इत्यत आह भाष्ये

सामान्यशब्दाश्चेति । (भा)

बोद्धुर्थं विशेषं विशेषबोधकपदान्तरसमभिव्याहारम् एवं च प्रकरणादिसापेक्षतयाऽर्थप्रत्यायकत्वं सामान्यशब्दत्वमिति भावः । एते तु नैवमित्याह

---

९३) इत्यनर्थकयोर्गत्युपसर्गसंज्ञाबाधिकां कर्मप्रवचनीयसंज्ञां शास्ति ॥ किं पुनरयं पर्य्युदासो यदन्यत् प्रत्ययादिति । आहोस्वित् प्रसज्यायं प्रतिषेधः प्रत्ययो नेति । कश्चात्र विशेषः । अप्रत्यय इति चेत्तिवेकादेशे प्रतिषेधोऽन्तवत्त्वात् । वा । अप्रत्यय इति चेत्तिवेकादेशे प्रतिषेधो वक्तव्यः । काण्डे

शब्दादारभ्य सुपः पकारेण प्रत्याहारः ॥ अन्तवत्त्वादिति । भा । पूर्वस्य प्रत्ययसदृशस्य प्रातिपदिकसंज्ञाकार्य्यमिति पूर्वं प्रत्यन्तवद्भावः ॥ आदिवत्त्वा-

यतस्त्विति। (कै)

त्वद्रीत्या हि प्रकृतिः स्वार्थं प्रत्ययार्थसामान्यं चाभिदधाति तत्र विना प्रकरणादिकं केवलस्वार्थस्य बोधः कथमपि न स्यात्। दृश्यते तु सः। संख्यादेश्च न सामान्यरूपेणापि बोधः। एवं च प्रत्ययमात्रात् न कदापि प्रत्ययार्थबोधः। प्रकरणाद्यसत्त्वेऽपि स्वार्थोपस्थितिः। शास्त्रवासनावतामतो नैषामुभयार्थवाधकत्वरूपं सामान्यशब्दत्वं ततः किमित्याह

न चेद् (भा)

इत्यादि॥

प्रत्ययार्थे (भा)

तद्द्योत्यार्थे। पञ्चकं प्रातिपदिकार्थ इति मुख्यपक्षे तस्य द्योतकत्वात् वर्णवारणायार्थवत् ग्रहणमित्युक्तम्। तत्र वर्णानामानर्थक्यं दृढकर्त्तुं पृच्छति भाष्ये

कुण्डे। किं कारणम्। अन्तवत्त्वात्। तिबतिपोरेकादेशोऽतिपोऽन्तवत् स्यात्। अस्त्यन्यत्तिप इति कृत्वा प्रातिपदिकसंज्ञा प्राप्नोति (१।२।४७)॥ अस्तु तर्हि प्रसज्यप्रतिषेधः प्रत्ययो नेति। न प्रत्यय इति चेदूङेकादेशे प्रतिषेध आदिवत्त्वात्। वा। न प्रत्यय इति चेदूङेकादेशे प्रतिषेधः प्राप्नोति। ब्रह्मबन्धूः (४।१।६६)। किं कारणम्। आदिवत्त्वात्।

दिति। भा। परकार्य्यप्रतिषेधे कर्त्तव्ये परं प्रत्येकादेशस्यादिवद्भावः॥ यदयमिति। भा। अथवा प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणमिति स्वादय उत्पद्यन्ते॥ द्वे इति। भा। तत्रान्तरङ्गत्वात् प्रत्ययोत्पत्तेः प्रागेव ब्रह्मबन्धूशब्दस्य प्रवृत्ता प्रातिपदिकसंज्ञेत्यूङेकादेशस्य पूर्वं प्रत्यन्तवद्भावा-

किं पुनरिति ॥ (भा)

उक्तमिति। (भा)

हयवरट् सूत्रे इति शेषः॥

अनर्थगतेरिति। (भा)

अर्थानवगतेरित्यर्थः। सङ्घातार्थवत्त्वाच्च वर्णानामर्थवत्त्वम् अन्यथानर्थकावयवकसमुदायोप्यर्थवान् स्यादित्यर्थः॥ नन्वर्थवत्त्वे प्रत्येकं सुप्स्यादत आह

संघातस्येति। (भा)

एकाज्द्विर्वचनन्यायेन न प्रत्येकं विभक्तिरिति भावः॥ अर्थशब्दस्याभिधेयपरत्वे दृष्टान्तासङ्गतिरत आह

अतत्प्रयोजनेति। (कै)

यथा तत्रातत्प्रयोजनकानां समुदायस्तत्प्रयोजनस्तथेहानर्थकानां समुदायोऽर्थवानिति भावः॥ भाष्ये

याच यावती चार्थमात्रेति (भा)

काचित् प्रयोजननिष्पत्तिरित्यर्थः॥ तदुपपादयति

भवति हि कश्चिदिति॥ (भा)

प्रत्ययाप्रत्यययोरेकादेशः प्रत्ययस्यादिवत् स्यात्। तत्र प्रत्ययो नेति प्रतिषेधः प्राप्नोति॥ नैष दोषः। आचार्य्यप्रवृत्तिर्ज्ञापयति उत्पद्यन्त ऊङन्तात् स्वादय इति यदयं नोङ्धात्वोः (६।१।१७५) इति विभक्ति स्वरस्य

दस्येव प्रातिपदिकत्वमिति न कश्चिद्दोषः॥ राजेति। भा। तत्र नलोपो न स्यात्। अत्राप्यन्तरङ्गत्वात् पूर्वमेव प्रवृत्ता प्रातिपदिकसंज्ञा बहिरङ्गेण

(अर्थवदधातुरप्रत्ययः प्रातिपदिकम् । १। २। ४५ ।)

विक्षिप्तानीति । (कै)

विरहतिरिह पृथक्करणे वर्त्तत इति भावः ॥ "अनर्थकस्येति" विशेषणकृत्यमाह

निपातानामिति ॥ (कै)

ननु पदादित्यधिकृत्य विधीयमानस्य निघातस्य पदविधित्वात् समर्थपरिभाषोपस्थितेः प्रकृते सामर्थ्याभावात् तदप्राप्तिरत आह

अर्थवदनर्थकयोरिति । (कै)

सामर्थ्यं व्यपेक्षालक्षणे ॥

सामर्थ्यादिति । (कै)

पदत्वसम्पादकप्रातिपदिकसंज्ञाविधानसामर्थ्यादित्यर्थः ॥

एकेति । (कै)

अत्रारुचिस्तु समर्थसूत्रे एकार्थीभावस्यैव ग्रहणेन निघातविधौ तदनुपस्थितिः । तदपवादस्य समानवाक्ये निघातेऽन्यस्य सत्वं चेति तदाह

समानेति ॥ (कै)

आख्यातमिति । (कै)

अत्र वाक्यलक्षणेऽर्थवत्त्वं न निविष्टमिति निखञ्जतीत्यादेरपि वाक्यत्वं बोध्यम् । एकतिङ्वाक्यमिति युक्तं वक्तुम् ॥

प्रतिषेधं प्राप्ति ॥ अथवा द्वे ह्यत्र प्रातिपदिकसंज्ञे अवयवस्यापि समुदायस्यापि । तत्रावयवस्य या प्रातिपदिकसंज्ञा तयान्तवद्भावात् स्वाद्युत्पत्ति-

---

प्रतिषेधेन न शक्यते निवर्तयितुमिति परिहारोऽस्ति ॥ नङिसम्बुद्ध्योरिति । मा । ननु हे सुराजन् हे अतिराजन्निति समासप्रातिपदिकसंज्ञार्थः प्रति-

नानावाक्येति। (कै)

स्वौजस् इत्यादेर्द्व्येकयोरित्यादेश्चेत्यर्थः। "अव्ययादाप् सुप" इति लिङ्गात् वाक्यभेदोऽप्यभिमत इति भावः॥ ननु प्रत्ययनियमे दोष एव इत्यत आह

नियमश्चार्थानामिति। (कै)

एकत्वे एकवचनमेवेति नियमो न त्वेकत्व एवैकवचनमिति भावः। एकवाक्यतापक्षेऽप्यौत्सर्गिकत्वात् सर्वविभक्त्येकवचनमित्यन्यत्रोक्तम्॥

संज्ञाविधानमिति। (कै)

तयोस्तद्विधानं च केवलं गत्युपसर्गसंज्ञाबाधनार्थमेवेति भावः॥ अनेन च ज्ञापकेन वार्त्तिकं प्रत्याख्यायते विभक्त्युत्पत्तिस्त्वकरीत्यैवेति बोध्यम्॥

न त्विति। (कै)

तथाच प्रयोगो व्यर्थः स्यादिति भावः। एतेन ज्ञापकशिथिल-मिति ध्वनयति। धात्वर्थानुवादकत्वरूपस्यापि योगस्य ग्रहीतुं शक्य-त्वादिति बोध्यम्। ध्वनितं चेदं "अधीपरी"ति सूत्रे भाष्ये॥

अन्तवद्भाव इति। (कै)

तस्य हि पर्य्युदासे शाब्दकार्य्यलाभ इति तस्यैव प्रवृत्तिर्नत्वादि-वत्त्वस्येति भावः॥ भाष्ये

भविष्यति। सुल्लोपे च प्रत्ययलक्षणत्वात्। वा। सुल्लोपे च प्रत्ययलक्ष-णेन प्रतिषेधः प्राप्नोति। राजा तक्षा (६।१।६८॥ ८।२।७)।

षेधः स्यात्। न चोत्तरप्राप्तेरप्रत्यय इति प्रतिषेधः। मध्येऽपवादा इति

(अर्थवदधातुरप्रत्ययः प्रातिपदिकम् । १। २। ४५ ।)

अस्त्यन्यत्तिप इति । (भा)

अतिप्प्रातिपदिकमिति न्यासाश्रयेणेदम् । एवं चोत्तरत्र तद्धितग्रहणं न कार्य्यमिति लाघवम् पञ्चनावप्रिय इत्यत्र पञ्चनावेत्यस्य प्रातिपदिकत्वेऽपि न क्षतिः। टजन्तस्योपसर्जनत्वेन ङीपोऽप्राप्तेः सुबपि समासे संख्याऽभावान्न प्रकृते संख्याया उक्तत्वाच्च । वस्तुतः प्रशस्तार्थवत्त्वाभावात् प्रातिपदिकत्वाप्राप्तिरेव। (एतेन टाप्स्यादित्युक्तिः परास्ता । इत्याधिकम् क पुस्तके)। काण्डे इत्यत्र च प्रातिपदिकत्वे ह्रस्वापत्तिर्दोष इति बोध्यम् । एवम् ओजायत इत्यत्रापि ह्रस्वापत्तिरत एव तिप् ग्रहणञ्चरितार्थम् ॥

परकार्य्यं इति । (कै)

आदिवत्त्वस्य हि प्रतिषेधरूपं शाब्दफलमिति भावः॥ न चादिवद्भावेन ऊ इत्यस्य प्रत्ययत्वेऽपि यतो विहितस्तदादित्वाभावात् कथं निषेधः । पूर्वान्तवद्भावेन तदादित्वं दुर्लभम् उभयत आश्रयणे तन्निषेधादिति वाच्यम् । धान्ते समुदाये दृष्टाः शब्दा इति न्यायेनैकदेशविकृतन्यायेन च ऊङ्प्रकृतित्वारोपादक्षतेः ॥ भाष्ये

द्वे हीति । (भा)

तत्रावयवस्य सिद्धा समुदायस्य प्रार्थ्यमानेति भावः ॥

तत्रान्तरङ्गत्वादिति । (कै)

प्रत्ययलक्षणेन प्रत्ययो नेति प्रतिषेधः प्राप्नोति॥ नैष दोषः । आचार्य्यप्रवृत्तिर्ज्ञापयति न प्रत्ययलक्षणेन प्रतिषेधो भवतीति यदयं नङिसम्बुद्ध्योः

न्यायात् । एवं तर्हि समासेऽप्यप्रत्यय इति वर्त्तते । अन्यथा सुराजाऽति-

प्रथमवृत्तिकत्वमचान्तरङ्गत्वम् । उपदेशप्राप्तायाः समुदायनिष्ठाया एव हि प्रत्ययान्तत्वेन निषेध इति बोध्यम् ॥ भाष्ये

अन्तवद्भावादिति । (भा)

एकदेशविकृतन्यायस्याप्युपलक्षणं न चैवं काण्डे इत्यत्र दोषः । अग्रे भाष्य एव वक्ष्यमाणत्वात् ॥

अत्रापीति । (कै)

अत्रेदं चिन्त्यं नायं दोषः । कार्य्यकालपक्षे व्यवस्थितयोः पक्षयोरेकेन लक्ष्ये सिद्धे पक्षान्तरेण दोषशंकाया अनौचित्यात् । ध्वनितं चेदं प्रगृह्यसंज्ञाप्रकरणेभाष्ये । अत एव पर्य्युदासपक्षे नायं दोषः शङ्कितोऽत्र भाष्ये । तस्माद् यथोद्देशेऽपि न सिध्यतीति भाष्याशयः । न च कैयटोक्तयुक्त्यासिध्यतीति वाच्यम् । लुगादिनेव प्रतिषेधेन जातनिवृत्तिरपीति भाष्याशयात् । भुक्तवन्तं प्रतीति न्यायस्यापि लुगादिशास्त्र इवात्रापि त्याग इति भावः ॥ अत एव ज्ञापकेन परिहरति

नैष इति । (भा)

यदि त्वनेन ज्ञापकेन जातनिवृत्त्यभाव एवान्वाख्यायते । लुगादिनाप्यनुत्पत्तिरेवोच्यते । अवयवलोपशास्त्रेऽपि तत् तदवयवरहितस्यैव तत्तद्विषये प्रत्ययत्वादिर्बोध्यते इत्युच्यते तदास्तु इत्याहुः ॥ ननु "हे" इति समासग्रहणं विध्यर्थमिति शङ्काशयः । सुराजन् शब्दे "न पूजनाद्" इति समासान्तनिषेधः ॥

(८।२।८) इति प्रतिषेधं शास्ति ॥ अथवा पुनरस्तु पर्य्युदासः । ननु

राजेत्यादौ विध्यर्थतायां सम्भवत्यां नियमार्थं समासग्रहणं न स्यात् ॥ यत्त-

एवं तर्हीति। (कै)

प्रत्याख्याने तु तद्धितनियमांशे वाध्यसामान्यचिन्ताश्रयणीयेति भावः। पर्य्युदासेऽपि ज्ञापकाश्रयणमावश्यकं न च स्वाश्रया प्रत्ययान्तत्वात्सिद्धिः। अतिदिश्यमानविरुद्धस्वाश्रयकार्य्याभावस्यातिदेशस्वभावसिद्धत्वात्। अत एव तण्डुलानित्यादेर्न प्रातिपदिकत्वमिति न नलोपस्तत्र इदं चासिद्धवत्सूत्रभाष्यकैयटयोः स्पष्टम्। सिद्धान्ते तु समासांशे तदनुवृत्तेः फलं चिन्त्यम्॥ भाष्ये

गृह्यते चेति। (भा)

अन्तवत्त्वेनेति भावः॥

संख्याप्रधानं चेति। (कै)

काण्डे तिष्ठत इत्यादौ। तत्र च संख्याया एव स्वाश्रयसम्बन्धेनान्वय इति भावः। तत्र संख्यायाः प्राधान्यं (चिन्त्यं इति नास्ति इ पुस्तके) न हि तद्वि शेष्यको बोधोऽनुभवसिद्धः शक्तेः प्राधान्यं च सम्बन्धघटकतया बोध्यम्। प्रथमान्तस्यापि वारिणी तिष्ठत इत्यादौ क्रियाकारकभावेनैवान्वयाद् वारिकर्त्तृकास्थितिरित्यर्थेन सम्बन्धघटकशक्तेरेव प्राधान्यमिति बोध्यम्॥

न च तयोरिति। (कै)

चोक्तमप्रत्यय इति चेत्तिवेकादेशे प्रतिषेधोऽन्तवत्त्वादिति। प्रसज्यप्रतिषेधेऽप्येष दोषः। द्वे ह्यत्र प्रातिपदिकसंज्ञे अवयवस्यापि समुदायस्यापि।

स्येति। भा। विभक्त्यन्तं च शक्तिसंख्याप्रधानं न च तयोर्लिङ्गयोगः। न वाऽन्तवद्भावेनार्थः शक्योऽतिदेष्टुमिति न भवति ह्रस्वः। अथवा नपुंसकत्वं

तदर्थशक्तिसंख्ययोरित्यर्थः। यस्य ह्रस्वस्तस्य साचाद्यदा नपुंसकत्वं तदा ह्रस्वः। यस्त्ववयवद्वारकं तस्य माभूदित्येतदर्थं तस्येत्युक्तेरिति भावः॥ भाष्ये

किं च नपुसके इति। (भा)

नपुंसकलिङ्गवदर्थे किमित्यर्थः॥

यस्येति। (भा)

यदर्थस्येत्यर्थः॥

कस्येति। (भा)

किं शब्दार्थस्येति अर्थः॥

प्रातिपदिकस्य (भा)

इत्यस्य सत्त्वप्रधानस्येत्यर्थः। एवं च प्रत्ययान्तपर्य्युदासो निषेधो वेत्युभयमपि व्यर्थम्। तत्फलं हि तत्र ह्रस्वव्यावृत्तिरेव। तस्या-मन्यथासिद्धायां तद्व्यर्थमेवेति भावः। फलान्तरं तु नास्त्येव। औत्स-र्गिकैकवचनस्येष्टसिद्ध्यर्थं क्वाचित्कत्वेन तदर्थस्य संख्याकर्माद्ययोगेन च सुबनापत्तेः। न च प्रत्ययान्तस्य प्रातिपदिकत्वे तदवयवसुपो-लुगापत्तिः। विधिवैयर्थ्यापत्तेः। तस्मात् धातुसाहचर्य्यात् विभक्त्य-तिरिक्तशब्दघटितप्रातिदिकावयवस्यैव तेन लुग् इति न दोषः। नापि फिट्स्वरप्राप्तिः। तत्तत् स्वराणां विशेषविहितानां बाधकत्वात्

गृह्यते च प्रातिपदिकाप्रातिपदिकयोरेकादेशः प्रातिपदिकग्रहणेन। तस्मा-

---

प्रातिपदिकार्थस्यैव सम्भवतीति प्रातिपदिकग्रहणं मुख्यप्रातिपदिकपरि-ग्रहार्थमित्यन्तवद्भावेन यत्प्रातिपदिकं तस्य ह्रस्वाभावः। अत्र च सूत्रे यद-

प्रकृतिप्रत्ययविभागशून्येष्वेव फिट्स्वरप्रवृत्तेश्च। नापि पचेरन्नित्यादौ न लोपप्राप्तिः। रन्नादेशस्यैव कर्त्तुं युक्तत्वात्। अन्यथा पर्य्युदासे ह्रस्वाभावेऽपि कार्य्यान्तराणामवारणादस्तु पर्य्युदास इति भाष्यासङ्गतेरिति दिक्॥ यथा न्यासेऽप्याह

अथवेति। (कै)

वस्तुतो यथा न्यासेऽपि नपुंसकलिङ्गवदर्थे विशेष्यतया वर्त्तमानस्येत्यर्थः॥

नचेदं तथेति।

अयं प्रयासो व्यर्थ एवेति दिक्॥

यत्तस्येति। (भा)

अनेनायमेवार्थो बोध्यते इति बोध्यम्॥

आहुरिति। (कै)

अचारुचिवीजं बहुपटव इत्याद्यर्थं व्युत्पत्तिपक्षेऽपि सूत्रमावश्यकमिति। इदं च बहुज्विधायके कैयटे स्पष्टम्। अव्युत्पत्तिपक्षज्ञापकं तु "[1]अतः कृकमिकंसे"ति सूत्रे कंसग्रहणमिति बोध्यम्। अस्यापि ज्ञापकं "[2]ऋलृक्" सूत्रे उपपादितम्॥

---

१ अतः कृकमिकंस कुम्भपात्रकुशाकर्णीष्वनव्ययस्य। ८। ३। ४६॥
२ शिवसू – २॥

दुभाभ्यामपि वक्तव्यं स्याद्ध्रस्वो नपुंसके यत्तस्येति। किं च नपुंसके। नपुंसकं यस्य गुणः। कस्य च नपुंसकं गुणः। प्रातिपदिकस्य॥

व्युत्पन्नमर्थवत्तदुदाहरणं व्युत्पत्तौ तु कृदन्तत्वादेव सिध्यतीति पृथगस्यारम्भोऽनर्थकः स्यात्। अव्युत्पत्तिपक्षस्य चेदमेव सूत्रं ज्ञापकमित्याहुः॥

[१]कृत्तद्धितसमासाश्च । १ । २ । ४६ ॥

अर्थवत्समुदायानामिति । (भा)

लोकेऽर्थबोधकतया पृथक्प्रयुज्यमानानां यः समुदाय इत्यर्थः ॥

---

१ समासग्रहणं किमर्थम् । समासग्रहणमुक्तम् । किमुक्तम् । अर्थवत्समुदायानां समासग्रहणं नियमार्थमिति ॥

---

१ अर्थवन्त एते प्रातिपदिकसंज्ञाः स्युः । विशेषणसामर्थ्यात् तदन्तविधिः । न हि जहत्स्वार्थायां वृत्तौ कृत्तद्धितानां चार्थोऽस्ति । भूतपूर्वगतिलभ्यस्तु न प्रशस्तः सः । भित् । क्वित् । अत्राधातुरिति पर्युदासे प्राप्ते कर्त्ता, हर्त्ता, अत्र तद्धितान्तानामेवेति नियमेन निरासे प्राप्ते सन्निहितत्वाच्च कृद्ग्रहणेन प्रागुक्तमेव बाध्यते न तु समासग्रहणकृतो नियमोऽपि । तेन कृद्ग्रहणपरिभाषानुपस्थानात् "मूलकेनोपदंशम्" इति वाक्यस्य न भवति ॥ ननु बाध्यसामान्यचिन्तायां समासनियमोऽपि बाध्यते । विशेषचिन्तायां तु मध्येऽपवादन्यायावतारात् तद्धितनियमोऽपि न बाध्येतेति चेत् । सत्यम् । आद्ये एवेह पक्षः । न च वाक्येऽतिप्रसङ्गः । शब्दाधिकारमाश्रित्येहार्थवच्छब्देनैकार्थीभावविवक्षणात् । अतिशये मतुप्स्मरणात् ।

(भूमनिन्दाप्रशंसासु नित्ययोगेऽतिशायने ।
संसर्गेऽस्तिविवक्षायां भवन्ति मतुबादयः ॥ ५ । २ । ९४)

वक्ष्यमाणरीत्या अप्रत्यय इति निषेधः प्रत्ययान्तपरः इति पक्षे तु पुरस्तादपवादन्यायादिष्टसिद्धिरिति दिक् ॥ तद्धितः । औपगवः । अत्रानेन मध्येऽपवादन्यायात् सर्वेष्टसिद्धिः । अप्रत्यय इत्यस्य प्रत्याख्यानपक्षेऽपि

पूर्वेण वा संज्ञानियमविधीनां विधिरूपेण निषेधरूपेण वा प्रवृत्तिरिति मतभेदस्योक्तत्वात् । एवं समासेऽपि । न चासमर्थसमासेषु विध्यर्थं समासग्रहणमिति वाच्यम् । अर्थवद्ग्रहणानुवृत्तेरुक्तत्वात् । असमर्थानां तर्हि कथं संज्ञेति चेत् धर्मिग्राहकमानादेवेति गृहाण । "असूर्य-ललाटयोः" (३ । २ । ३६) इत्यादिना हि समास उपपदे कृद्विधीयते । उपपदं च महासंज्ञाकरणबलात् विभक्त्यन्तमेव । न चैवमपि स्त्रीप्रत्यये तदादिनियमाभावात् (परिभाषेन्दुशे—२७) राजकुमारीत्यादौ प्रत्ययान्ते विध्यर्थं तदिति वाच्यम् । अन्तरङ्गस्यापि हल्ङ्यादिलोपस्य लुग्विषये प्रवृत्त्या श्रूयमाण एव सुपि समासप्रवृत्तेः । अत एव गोमत्प्रिय इत्यादौ नुमादयो नेति वक्ष्यते । तस्मात् प्रकृते समासग्रहणं नियमार्थं सद्वाक्यस्य संज्ञां निवर्त्तयति इति स्थितम् । नियमस्य सजातीयापेक्षः । यत्र पूर्वो भागः पदमुत्तरश्च प्रत्ययभिन्नः तादृशस्य समुदायस्य चेत् स्यात्तर्हि समासस्यैवेति । षड्विधेऽपि समासे पूर्वभागस्य पदत्वाव्यभिचारात् । तेन वज्रच् पूर्वस्यास्यैव संज्ञेति बहुपटच इति टकारस्योदात्तता लभ्यते । प्रथमस्य जसो लुकि "चितः सप्रकृतेर्बह्वकजर्थम्" (६ । १ । १६३ । वा) इति चित् स्वरे कृते पुनर्विभक्त्युत्पत्तेः । अन्यथा तु जसेवोदात्तः स्यात् । उत्तरश्चेत्यादिकिम् । हरिष्वित्यादेरनेन व्यावृत्तिर्माभूत् । एवमस्तु को दोष इति चेत् । शृणु । तथा सति जन्मवान् इत्यादौ तद्धितान्ते विध्यर्थं तद्धितग्रहणं स्यात् । राजानौ इत्यादेस्तु प्रातिपदिकत्वं केन वार्यताम् । न तावदनेन नियमेन । पूर्वभागस्यापदत्वात् । नापि तद्धितग्रहणेन । तस्योक्तरीत्या नियमार्थत्वायोगात् । न च "सुपोधातुप्रातिपदिकयोः" (२ । ४ । ७१) इति धातुग्रहणं प्रत्ययान्तानां प्रातिपदिकसंज्ञा नेति ज्ञापकमिति वाच्यम् । तस्य प्रासादीयतीत्यादौ हरिष्वितिवदप्रातिपदिके चरितार्थत्वात् । नापि ङ्याब्ग्रहणं ज्ञापकम् । लिङ्गविशिष्टपरिभाषया सिद्धौ तस्यान्यार्थताया एव सिद्धान्तयिष्यमाणत्वात् । तस्मादुक्तमेव साधु । यद्यपि प्रकृतिप्रत्ययभावानापन्नसङ्घातविषयको नियम इत्यपि सुवचं तथापि सरूपसूत्रे समुदायाद्विभक्त्युत्पत्तिरिति ग्रन्थं योजयितुमिदं गौरव-

मादृतम्। निष्कर्षे तु तथैवास्तु। तथा च तद्धितग्रहणं नियमार्थमेव। भेदसंसर्गद्वारकमर्थवत्त्वमिति कैयटस्याप्ययमेव भावः। भेदे परस्परपरिहारेण प्रयोगे सति यः संसर्गस्तद्द्वारकमित्यर्थात् न तु भेदः संसर्गो वा द्वयं वा वाक्यार्थ इत्याशयेन तद्ग्रन्थः। बह्वच् समासयोर्वैरूप्यालाभात्। यद्वा। सात्पदाद्योरिति सातिग्रहणात् प्रत्ययो न प्रातिपदिकमिति सिद्धे पूर्वसूत्रस्थं प्रत्ययग्रहणं सामर्थ्यात्तदन्तपरम्। तद्धितग्रहणन्तु विध्यर्थमेव। स्यादेतत्। पक्षत्रयेऽपि राजपुरुषावित्यादौ पुरुषावित्यादेः संज्ञादुर्वारेति प्रातिपदिकावयवत्वात् सुपो लुक् स्याद् इति चेन्नैवम्। जहत् स्वार्थायामानर्थक्यात्। अजहत् स्वार्थायामपि पूर्वपदविनिर्मुक्तस्य विशिष्टार्थविरहेण तत्सहितस्यैव विशिष्टार्थगमकत्वात्। प्रशंसायां हि मतुव् इत्युक्तम्। एवं घटपटावित्यादावपि मिलितयोरेव पदयोः सहभूतार्थता। प्रत्ययानां प्रकृत्यर्थान्वितस्वार्थबोधकत्वाच्च। घटावित्यंशो नार्थवानिति। एतेनासमर्थसमासे दशदाडिमादिवदनर्थके विध्यर्थं समासग्रहणं किं न स्यादिति चोद्यं प्रत्युक्तम्। अर्थवद्ग्रहणस्येहार्थतया एवोक्तत्वादिति दिक्। यदि तु नैयायिकरीत्या अर्थवत्त्वं वृत्तिमत्त्वं तच्च समासस्य नास्तीत्याश्रित्य समासग्रहणं विध्यर्थम्। तद्धितग्रहणमपि तथा। अप्रत्यय इति तु प्रत्ययवारणार्थमित्याश्रीयते तथापि न क्षतिः। तद्धितग्रहणस्य तद्विशिष्टपरतामाश्रित्य बहुपटव इत्यस्य सुसाधुत्वात्। किन्त्वस्मिन् पक्षे सिद्धान्तविरोधः। मूलकेनोपदंशं पचतकीत्यत्राति-प्रसङ्गश्चेति यथास्थितमेवास्तु। इह प्रकरणे यथा श्रुताः प्राचां ग्रन्था दुष्टा एवेत्यवधेयम्। निपातस्यानर्थकस्य प्रातिपदिकसंज्ञा वक्तव्या येषां द्योत्योऽप्यर्थो नास्ति तदर्थमिदम्। अवघति। अनुक्तसमुच्चयार्थाच्चकारात्सिद्धमिदम्। अनुकरणेषु तु अनुकरणेन सहाभेदविवक्षायामर्थवत्त्वाभावान्न प्रातिपदिकता। भूसत्तायामिति यथा। भेदविवक्षायान्तु संज्ञा स्यादेव। "भुवो वुग्" इति यथा। न चाधातुरिति पर्युदासापत्तिः। प्रकृतिवदनुकरणमित्यतिदेशस्यानित्यतयोवङंशे प्रवृत्तावपि संज्ञांशे ऽप्रवृत्तिसम्भवात्। एतच्च ऋल्कसूत्रे उपपादितम्॥

[1]ह्रस्वो नपुंसके प्रातिपदिकस्य।
१। २। ४७॥

शक्तिप्रधानत्वादिति। (कै)

तिङभिहितकर्तृशक्तिबोधकत्वेन प्रथमाया अपि शक्तिप्रधानत्वमित्याशयः॥

द्वयोरपीति। (कै)

समुदायेनेति शेषः। काण्डस्य विशेषणतया प्रविष्टत्वादिति भावः॥

साधनेति। (कै)

साधनगतां संख्यामाख्यातं तदर्थः। क्रिया यथोपादत्ते तदुपादानेन यथा संख्यावती तथा तद्गतलिङ्गोपादानेन लिङ्गवत्यपि स्यादित्यर्थः। कारकगता संख्या आरोपेण क्रियायामेव बोध्यते तिङादिभिरिति स्पष्टं "ङ्याप् प्रातिपदिकाद्" इति सूत्रे भाष्यकैयटयोः॥ अलिङ्गसंख्यस्याव्ययत्वादाह

---

१ प्रातिपदिकग्रहणं किमर्थम्। नपुंसकह्रस्वत्वे प्रातिपदिकग्रहणं तिब्निवृत्त्यर्थम्। वा। नपुंसकह्रस्वत्वे प्रातिपदिकग्रहणं क्रियते तिब् निवृत्त्यर्थम्। तिबन्तस्य ह्रस्वत्वं माभूत्। काण्डे कुड्ये। रमते ब्राह्मणकुलमिति॥ अव्ययप्रतिषेधः। वा। अव्ययानां प्रतिषेधो वक्तव्यः। दोषा ब्राह्मण-

---

१ प्रातिपदिकग्रहणमिति। भा। नपुंसकलिङ्गं द्रव्यस्यैव सम्भवति। द्रव्यवाचित्वं तु प्रातिपदिकस्यैव सम्भवति न तु सुबन्तस्य शक्तिप्रधानत्वात् नापि तिङन्तस्य क्रियाप्रधानत्वादिति प्रश्नः। काण्डे इति। द्वयोरपि शक्तिशक्तिमतोरभिधानादस्ति नपुंसकार्थवृत्तित्वं। सुबन्तस्यापीति भावः॥

यथेति। (कै)

तिङन्तविषयोपवर्णितेत्यर्थः। यथा तत्र साधनत्वसम्बन्धेन तद्धर्मग्रहणं तथात्र सामानाधिकरण्यात् स्यादिति भावः॥ वैयधिकरण्येन दोषा शब्दे नपुंसकत्वाभिव्यक्त्यभावादाह

दोषासहेति। (कै)

दोषा शब्दो लाक्षणिक इत्यभिमानः॥

इत्यत्रार्थे इति।

शब्दशक्तिस्वभावादिति भावः॥ ननु कारकं क्रियाया न द्रव्यस्य इति कथं नपुंसकस्याधिकरणमित्युक्तिरत आह

ब्राह्मणकुलसाधनानामिति॥ (कै)

तत्रोपपत्तिमाह

आधेयेति॥ (कै)

बहिरङ्गत्वादिति। (कै)

अर्थधर्मनपुंसकत्वाश्रयत्वादित्यर्थः। एवं च पूर्वं दीर्घे ततो ह्रस्वे लक्ष्ये लक्षणस्येति न्यायेन पुनर्दीर्घाप्रसङ्ग इति भावः। वस्तुतः

कुलम्। दिवा ब्राह्मणकुलमिति॥ स तर्हि वक्तव्यः। न वक्तव्यः। नात्राव्ययं नपुंसके वर्त्तते। किं तर्हि। अधिकरणमत्राव्ययं नपुंसकस्य॥ इह तर्हि प्राप्नोति। काण्डीभूतं वृषलकुलम्। कुड्यीभूतं वृषलकुलमिति॥ न

रमते ब्राह्मणकुलमिति। भा। यथैव साधनाश्रया संख्यामाख्यातमुपादत्ते तथा तल्लिङ्गमपि॥ अव्ययप्रतिषेध इति। भा। यथोपवर्णितन्यायेनाव्ययस्यापि लिङ्गयोगात् प्राप्तिः॥ दोषा ब्रह्मणकुलमिति। भा। दोषा

समत्वेऽपि परत्वात् "चौ" इति दीर्घे ततो ह्रस्वे लक्ष्ये लक्षणस्येति न्यायेन पुनरप्रवृत्तिरिति बोध्यम् ॥

असत्त्वेति (कै)।

क्वचिल्लिङ्गवता सामानाधिकरण्येऽपितस्य लिङ्गवत्तया स्वार्थबोधकत्वाभाव इति भावः ॥

किं चिद् (भा)

इत्यादिना एतावता द्विविधमेवाव्ययमिति भ्रमितव्यम् उभयातिरिक्तस्यापि चाव्ययस्य सत्त्वात्। हिरुगादेः क्रियाप्रधानत्वं क्रियामात्रविशेषणत्वेन "काण्डीभूतमि"त्यत्राप्येतदेव स्वभावाच्च तादृशस्य लिङ्गाद्ययोगः ॥

न चैतयोरिति। (भा)

प्रायेणेति शेषः। तत्राव्ययार्थस्य काण्डेत्यादेश्चोभयायोगः।

वा लिङ्गाभावात्। वा। न वा वक्तव्यम्। किं कारणम्। लिङ्गाभावात्। अलिङ्गमव्ययम्॥ किं पुनरयमव्ययस्यैव परिहारमाहोस्वित् तिबन्तस्यापि। तिबन्तस्यापीत्याह। कथम्। अव्ययं हि किंचिद्विभक्त्यर्थप्रधानं किंचित्क्रियाप्रधानम्। उच्चैर्नीचैरिति विभक्त्यर्थप्रधानं हिरुक् पृथगिति क्रियाप्रधानम्। तिबन्तं चापि किंचिद्विभक्त्यर्थप्रधानं किंचित्क्रियाप्रधानम्।

सहचरितत्वाद् ब्राह्मणकुलमेव दोषा शब्देनोच्यते इति ह्रस्वप्रसङ्गः। नात्राव्ययमिति। भा। दोषाशब्दो रात्रावित्यर्थे वर्त्तते दिवाशब्दोऽप्यहनीत्यत्रेति। ब्राह्मणकुलसाधनानां क्रियाणामधिकरणं कालो भवन् ब्राह्मणकुलस्याधिकरणं भवति। दोषा दृश्यते चरत्यधीते चेति। आधेयव्यवधानेनाधिकरणस्य क्रियाधारणात्॥ काण्डीभूतमिति। भा। प्रकृतिविका-

"रमते" इत्यादेर्लिङ्गायोग इति बोध्यम्। अन्यथा "हतशायिकाः शय्यन्ते" इत्यादौ "पचति रूपम्" इत्यादौ च ताभ्यां योगेन भाष्यासङ्गतिः स्यात्॥

भावशक्तीति। (कै)

पदार्थशक्तिरित्यर्थः। "विचित्रत्वादि"त्यनेनेदं सूचयति "पचति कल्पम्" इत्यादौ भवत्येव। पचतकीत्यादौ च नेति॥ "काण्डे तिष्ठत" इति प्रथमायाः प्रातिपदिकार्थे विधानाद्विभक्त्यर्थाप्रधानत्वेनास्येव लिङ्गयोग इति स्यादेव ह्रस्वत्वमित्यभिमानः॥ समाधत्ते

संख्याया इति। (कै)

विभक्त्या संख्याया लिङ्गवत्त्वेनाप्रतिपादनं भावशक्तेर्वैचित्र्यादिति भावः। अत्र "संख्याया" इति शक्तेरुपलक्षणं संख्यायाः प्राधान्यासम्भवात्। प्रथमास्थलेऽपि यथा शक्तिरस्ति तथोक्तम्॥ भाष्ये

काण्डे कुड्ये इति विभक्त्यर्थप्रधानं रमते ब्राह्मणकुलमिति क्रियाप्रधानम्। न चैतयोरर्थयोर्लिङ्गसंख्याभ्यां योगोऽस्ति। अवश्यं चैतदेवं विज्ञेयम्। क्रियमाणेऽपि हि प्रातिपदिकग्रहण इह प्रसज्येत। काण्डे कुड्ये। द्वे ह्यत्र प्रातिपदिकसंज्ञे अवयवस्यापि समुदायस्यापि। गृह्यते च प्रातिपादिका-

---

र्थयोरभेदविवक्षायां च्विप्रत्ययः। द्वयोरप्यत्र तयोर्नपुंसकत्वाद् ह्रस्वप्रसङ्गः। कृते ह्रस्वत्वे "च्वौ च" (७। ४। २६) इति दीर्घो भविष्यतीति चेत्। ह्रस्वस्य बहिरङ्गत्वाद्दीर्घे कर्त्तव्येऽसिद्धत्वाद्दीर्घाप्रसङ्गः। एवं रमते इत्यत्रापि ह्रस्वे सति टेरेत्वस्याप्रसङ्गः॥ न चेति। भा॥ असत्त्ववाचित्वादव्ययस्य न तेन लिङ्गं प्रतिपाद्यत इत्यर्थः॥ न चैतयोरिति। भा। आख्यातस्य शक्त्याश्रयद्रव्यसंख्याप्रतिपादने सामर्थ्यं न तु तल्लिङ्गप्रतिपादने

अवश्यं चैतदेवमिति। (भा)

एतत् तिबन्तम् अलिङ्गमित्यवश्यं स्त्रीकार्य्यमित्यर्थः॥ समुदायस्याप्युक्तं प्रातिपदिकत्वमुपपादयति

गृह्यते च प्रातिपदिक (भा)

इत्यादिना॥

अवयवधर्म्मेणेति। (कै)

अवयवभूतप्रकृत्यर्थधर्म्मेणेत्यर्थः। समुदायः प्रत्ययान्तः। यद्यवयवधर्म्मेण समुदायस्य व्यपदेशस्तदा प्रातिपदिकग्रहणे क्रियमाणेऽप्येतदवश्यवाच्यमिति भाष्यार्थ इति भावः॥ भाष्ये

उभाभ्यामपि वक्तव्यमिति। (भा)

एवमर्थकतया सूत्रं व्याख्येयमित्यर्थः॥ अवयवद्वारा समुदायस्यापि नपुंसके वृत्तिसम्भवात् कथमनेन परिहारोऽत आह

साक्षादिति। (कै)

तस्यैव तज्जन्यबोधविशेष्यस्य अनुपजातव्यतिरेकस्य अनुपजात-

प्रातिपदिकयोरेकादेशः प्रातिपदिकग्रहणेन। तस्मादुभाभ्यामपि वक्तव्यं स्याद् ह्रस्वो नपुंसके यत्तस्येति। किं च नपुंसके। नपुंसकं यस्य गुणः। कस्य च नपुंसकं गुणः। प्रातिपदिकस्य॥ यन्त्रेकादेशदीर्घैत्वेषु प्रतिषेधः।

विचित्रत्वाद्भावशक्तीनाम्। काण्डे तिष्ठत इत्यत्रापि संख्यायाः प्राधान्यान्नपुंसकत्वायोगः॥ अवश्यमिति। भा। यद्यवयवधर्म्मेण समुदायो व्यपदिश्यते इत्यर्थः॥ यत्तस्येति। भा। साक्षात्तस्यैव यदा नपुंसकत्वं तदा ह्रस्वः। यस्य त्ववयवद्वारकं तस्य माभूत्। अथवा तस्यैवानुजातव्यति-

सम्बन्धस्य अनुपजातेतराकाङ्क्षस्येति यावत् ॥ अनेन सत्त्वप्रधानत्वमुपलक्षितम्।

सूत्रकारेण त्विति। (कै)

अवयवद्वारकमपि नपुंसकवृत्तित्वं गृह्यते इति तदाशयः। अत्र यद्वक्तव्यं तदुक्तम्। यदर्थस्य शास्त्रे नपुंसकगुणः प्रसिद्धस्तस्य नपुंसके वर्त्तमानस्य ह्रस्व इति भाष्यार्थः॥ भाष्ये

अन्तरङ्गं ह्रस्वत्वमिति। (भा)

एवं ह्रस्वत्वे कृते दीर्घप्रवृत्तेर्लक्ष्येलक्षणस्येति न्यायेन पुनरप्रवृत्तिरित्यर्थः॥

चक्रकप्रसङ्ग इति। (कै)

लक्ष्येलक्षणस्येति न्यायमनालोच्येदम्॥

वा। यण्एकादेशदीर्घत्वेषु प्रतिषेधो वक्तव्यः। युगवरत्राय युगवरत्रार्थम् युगवरत्रेभ्यः॥ यण्एकादेशदीर्घत्वेषु बहिरङ्गलक्षणत्वात् सिद्धम्। वा। बहिरङ्गा एते विषयः (६।१।१०१॥ ७।३।१०२-३)। अन्तरङ्गं ह्रस्वत्वम्। असिद्धं बहिरङ्गमन्तरङ्गे॥

रेकस्येत्यर्थः। विभक्त्यन्तं चोपजातव्यतिरेकमिति ह्रस्वाभावः॥ सूत्रकारेण तु प्रातिपदिकग्रहणं मुख्यप्रातिपदिकपरिग्रहार्थं कृतं प्रातिपदिकस्यैव नपुंसके वृत्तिसम्भवात्। तेनान्तवद्भावादतिदिष्टप्रातिपदिकस्य ह्रस्वाभावः॥ युगवरत्रायेति। भा। दीर्घे कृते पुनर्ह्रस्वः पुनर्दीर्घ इति चक्रकप्रसङ्गः॥

[1]गोस्त्रियोरुपसर्जनस्य।१।२।४८॥

भाष्यवार्त्तिकयोर्विभज्यकथनाकथने हेतुमाह

धात्विति ॥ (कै)

ननु स्वरितत्वे उत्तरत्रानुवृत्तिरेव स्यात्। न तु तदधिकारस्य-लाभोऽत आह

स्वरितेनेति ॥ (भा)

ह्रस्वभावित्वाभावादिति । (कै)

न चातिमतेरित्यादौ सम्भवगुणस्य बहिरङ्गत्वेनासिद्धत्वात्। किं च तद् ग्रहणे अन्तरङ्गत्वात् पूर्वमेव ह्रस्वे ततो गुणे लब्धे लक्षणस्येति न्यायेन पुनः तद्प्रवृत्तौ फलाभाव इति भावः॥ भाष्ये

स्त्रीप्रत्ययेनेति । (भा)

एवं च स्त्रीप्रत्यये तदादिनियमाभावाद् ह्रस्वसिद्धिरित्यर्थः॥

अतिकारीषेति । (कै)

कारीषगन्ध्यामतिक्रान्तस्य पुत्र इति विग्रहः॥

अनुपसर्जनेति । (कै)

---

१ उपसर्जनह्रस्वत्वे च। वा। उपसर्जनह्रस्वत्वे च किम्। यण्एकादेशाग्रदीर्घत्वेषु प्रतिषेधो वक्तव्यः (वा—१।२।४७)। अतिखट्वाय अतिखट्वार्थम् अतिखट्वेभ्यः॥ उपसर्जनह्रस्वत्वे च। किम्। बहिरङ्गलक्षणत्वात् सिद्धमित्येव (वा—१।२।४७)। बहिरङ्गा एते विधयः। अन्तरङ्गं ह्रस्वत्वम्। असिद्धं बहिरङ्गमन्तरङ्गे॥ गोटाङ्ग्रहणं कृन्निवृत्त्यर्थम्। वा। गोटाङ्-

एवं च ष्यङः अतिक्रान्तार्थं प्रत्युपसर्जनत्वात् तदादिनियमेन पुत्रोत्तरपदकतत्पुरुषेष्व्यङन्तस्यापूर्वपदत्वान्न सम्प्रसारणमित्यर्थः॥

उपसर्जनत्वादिहेति। (कै)

वस्तुतस्त्विन्त्यमेतत्प्रत्यासत्यायस्य ("पुत्रोत्तर" इत्यारभ्य "यस्य" इत्यन्तं नास्ति क पुस्तके) समुदायस्त्रीप्रत्ययान्तत्वं प्रार्थ्यते तदर्थं प्रत्यनुपसर्जनत्वेन तदादिनियमाप्रवृत्तौ दोषाभावात्॥

किं दीर्घेति। (कै)

"हल्ङ्यादि" सूत्रे "हल्ङ्याब्भ्य" इत्यस्य परविशेषणत्वेनावयव-श्चन्तात् परत्वेन च निष्कौशाम्बिरित्यादौ सोर्लोपवारणार्थत्वात् दीर्घग्रहणस्येदमपि चिन्त्यम्। विहितविशेषणे तु यासेत्यादावव्याप्तिः। कर्त्त्रीत्यादावव्याप्तिश्च (कर्त्री इत्यादा- इति नास्ति ङ पुस्तके)। अत्वादिविधौ विषयसप्तमी तु "तस्मिन्निति" शास्त्रबाधापत्त्या गमकाभावेन चायुक्तेति दिक्॥

कारीशब्दादपीति। (कै)

तथा च कुम्भशब्दे आदिवृद्धिर्नस्यादितीति भावः॥ ननु पुम्व-दतिदेशे स्त्रीप्रत्ययस्यापि निवृत्तिः स्यादत आह

यथेति। (कै)

ईयसः परस्य स्त्रीप्रत्ययस्य बहुव्रीहौ विद्यमानस्य पुम्वत्। पुंसि

ग्रहणं कर्त्तव्यम्। किमिदं टाङिति। प्रत्याहारग्रहणम्। क्वसन्निविष्टानां प्रत्याहारः। टापः प्रभृत्या ष्यङो ङकारात् (४। १। ४-१८)। किं प्रयोजनम्। ह्रस्वनिवृत्त्यर्थम्। ह्रत्स्त्रिया धातुस्त्रियाश्च ह्रस्वत्वं माभूदिति। अतितन्त्रीः अतिश्रीः अतिलक्ष्मीरिति॥ तत्तर्हि वक्तव्यम्। न वक्तव्यम्।

यथा पपीरित्यादौ ईकारस्य श्रवणं तथा तत्र स्त्रीप्रत्ययभूतस्यापीत्येवं वचनव्यक्त्येति भावः। अत एवात्रैवेदं कृतम्। अन्यथा पुंवद्भाव प्रकरण एव वदेत्। "ईयसश्च" इति प्रतिषेधात्कप्। नपुंसकह्रस्वत्वं तु भवत्येव अत्र पाठात्। न च नेत्येव सिद्धे पुंवद् वचनं व्यर्थं वार्त्तिकाक्षरेषु लाघवगौरवविचाराभावादित्याहुः। अन्ये तु तस्याप्यभावं मन्यन्ते। अत एवोत्तरवार्त्तिके नपुंसकह्रस्वत्वस्यापि निषेध इति भ्रमव्यावृत्तये गोसमासनिवृत्त्यर्थमित्युक्तम्। अत एव च विग्रहे स इत्यादि न प्रयुक्तमित्याहुः। तत्र समासपदं स्त्र्यन्तसमासपरम्॥

प्रथमेति। (कै)

षष्ठीति प्रथमानिर्दिष्टत्वादित्यर्थः। शास्त्रीयमिहोपसर्जनं न तु केवलं लौकिकमेवेति भावः। प्रत्ययलक्षणेनाप्रत्यय इति निषेधाप्रवृत्तेर्गोशब्दस्य प्रातिपदिकत्वमस्त्येव॥

राजकुमारीशब्द इति। (कै)

नन्वस्यानुपसर्जनत्वात्तदादिनियमाभावेन प्रत्ययान्तत्वात् कथं प्रातिपदिकत्वम्। न च समासत्वात्। समासग्रहणस्य नियमार्थत्वभङ्गापत्तेः। तत्राप्रत्यय इत्यनुवृत्तेरुक्तत्वेन तेनापि दुर्लभत्वाच्चेति चेन्न स्त्रीप्रत्ययविशेषस्य सामान्यस्य वा ग्रहणाभावेन तदप्रवृत्तेः॥ भाष्ये

स्त्रीग्रहणं स्वर्यते तत्र स्वरितेनाधिकारगतिर्भवति (१। ३। ११)। "स्त्रियाम्" (४। १। ३) इत्येवं प्रकृत्य ये विहितास्तेषां ग्रहणं विज्ञास्यते। स्वरितेनाधिकारगतिर्भवतीति न दोषो भवति॥ यद्येवं प्रत्ययग्रहणमिदं भवति तत्र प्रत्ययग्रहणे यस्मात् स तदादेर्ग्रहणं भवतीतीह न प्राप्नोति। अतिराजकुमारिः अतिसेनानीकुमारिरिति। अस्त्रीप्रत्ययेने-

किमुच्यते इति। (भा)

गोस्त्रीनिवृत्यर्थमित्येव वक्तुं युक्तमिति भावः॥

न पुनरिति। (भा)

असमासोऽपि किं चित् पूर्वपदस्त्र्यन्तं नेति काक्वा प्रश्नः॥ भाष्ये

न चान्तरेणेति। (भा)

तदाशयमाह

इह त्विति। (कै)

एतच्चाप्रत्यय इति सूत्रन्यासे। अतिबिति न्यासे तु कुमारीत्यस्यापि तत्त्वमस्त्येवेति तत्रापि दोषः॥ भाष्ये

[1]**उभयत इति।** (भा)

एणेय सिद्धये "स्त्रीभ्यो ढक्" (४। १। १२०) इत्यत्र प्रातिपदिकादित्यसम्बन्धात् गाङ्गेये न दोषः। [2]प्रातिपदिकग्रहणे लिङ्गविशिष्टस्येति परिभाषामनाश्रित्येदं तथा हि प्रातिपदिकत्वतद्व्याप्यधर्माणां स्त्रीप्रत्ययविशिष्टे बोधनमिति "[3]बहुव्रीहेरूधस" इत्यत्र भाष्ये स्पष्टम्। वक्ष्यमाणसमाधानेन [4]समाधानादेकदेशुक्तावत्र

१ अ ४। पा १। सू १२०॥ २ परिभाषेन्दुशे – १२॥
३ अ ४। पा १। सू २५॥ ४ 'सर्वे'। इ॥

त्येवं तत्॥ ईयसो बहुव्रीहौ पुंवद्वचनम्। वा। ईयसो बहुव्रीहौ पुंवद्भावो वक्तव्यः। बह्वः श्रेयस्योऽस्य बहुश्रेयसी। विद्यमानश्रेयसी॥ पूर्वपदस्य च प्रतिषेधे। गोसमासनिवृत्त्यर्थम्। वा। पूर्वपदस्य च प्रतिषेधो वक्तव्यः। किं प्रयोजनम्। गोसमासनिवृत्त्यर्थम्। गोनिवृत्त्यर्थं समासनिवृत्त्यर्थं च। गोनिवृत्त्यर्थं तावत्। गोकुलं गोक्षीरं गोपालक इति॥ समासनिवृत्त्य-

नात्यादृतं भगवतेति बोध्यम् ॥ ननु चित्रगुरित्यादौ गोन्तस्य प्रातिपदिकस्योपसर्जनत्वाभावाद्ध्रस्वाप्राप्तिरत आह

उपसर्जनेति। (कै)

श्रुतत्वादिति भावः ॥

गोस्त्रियौ इति। (कै)

गोस्त्रीप्रत्ययान्तावित्यर्थः ॥

न तु सूत्रस्येति। (कै)

वस्तुतः सूत्र शेषत्वेऽपि न क्षतिः। "[1]येन विधिः" "[2]असमासे निष्कादिभ्यः" इति सूत्रभाष्ययोरस्याः प्रत्ययविधिविषयतायाः सूत्रोपात्तान्तादिशब्दविषयतायाश्च बोधितत्वेनास्य भाष्यस्यैकदेश्युक्तित्वावश्यकत्वात् वक्ष्यमाणसमाधानेनास्यापि परिहारः। तच्च गोशब्दांशेऽप्यावश्यकमिति ध्वनयन्नाह

अगोपुच इति। (कै)

ततस्तत्पुरुषादिति समासान्त निषेधः॥ भाष्ये

अप्रधानमुपसर्जनमिति। (भा)

---

१ अ १। पा १। सू ७२॥ २ अ ५। पा १। सू २०।

र्थम्। राजकुमारीपुत्रः सेनानीकुमारीपुत्र इति। किमुच्यते समासनिवृत्त्यर्थमिति न पुनरसमासोऽपि किंचित् पूर्वपदं यदर्थः प्रतिषेधः स्यात्। स्त्र्यन्तस्य प्रातिपदिकस्योपसर्जनस्य ह्रस्वो भवतीत्युच्यते न चान्तरेण समासं स्त्र्यन्तं प्रातिपदिकमुपसर्जनमस्ति। ननु चेदमस्ति। खट्वापादः

अत्र सूत्रे सम्भवसत्त्वात् लौकिकार्थसमानाधिकरणशास्त्रीयस्यैव ग्रहणमिति भावः। केवललौकिकस्य ग्रहणे तु गार्गी चासौ वृन्दारिका चेति गार्ग्यवृन्दारिका इत्यादौ वृन्दारिका ("इत्यादौ वृन्दारिका" इति नास्ति क पुस्तके) शब्दस्य गुणशब्दत्वादप्रधानत्वादुत्तरपदत्वात्तदन्तस्य समासप्रातिपदिकत्वाच्च ह्रस्वप्रसङ्ग इति दिक्॥

यं प्रतीत्यादि। (भा)

यदर्थं प्रति यदर्थस्याप्रधानत्वं तद्बोधकस्य चेत्तद्बोधको गोशब्दादिरन्तो भवतीत्यर्थ इति कैयटानुसारिणः। परे तु "प्रथमानिर्दिष्टम्" (१।२।४३) इति सूत्रोक्तरीत्या येन शब्देन समासविधौ यत्प्रथमानिर्दिष्टं तस्य तं प्रत्यप्रधानत्वेनोपसर्जनत्वात् प्रत्यासत्त्या तत्समासप्रातिपदिकान्तस्यैव ह्रस्व इति भाष्यार्थः। अत एव "यं प्रति यदिति" भिन्नलिङ्गनिर्देश इत्याहुः॥ वार्त्तिकेन यथा न सिद्ध्यति तथोपपादयति

त्रिपदे इति॥ (कै)

द्विगुसमास इति। (कै)

अत एव तस्य समुदायस्य प्रातिपदिकत्वं कपि कृते स्त्रीप्रत्ययान्तत्वाभावादाह

मालापाद इति। एकादेशे कृतेऽन्तादिवद्भावात् प्राप्नोति। उभयत आश्रये नान्तादिवत्॥ गोनिवृत्त्यर्थेन तावन्नार्थः। गोऽन्तस्य प्रातिपदिकस्योपसर्जनस्य ह्रस्वो भवतीत्युच्यते न चैतद्गोऽन्तम्। ननु चैतदपि व्यपदेशिवद्भावेन गोऽन्तम्। व्यपदेशिवद्भावोऽप्रातिपदिकेन॥ समासनिवृत्त्यर्थेन चापि नार्थः। स्त्र्यन्तस्य प्रातिपदिकस्योपसर्जनस्य ह्रस्वो भवतीत्युच्यते

अन्तरङ्गत्वादिति। (कै)

कपः प्राक् प्राप्तौ ह्रस्वः "कपि चे"ति वार्त्तिकेन कथं निवर्त्त्येत अत आह

कपीति चेति॥ (कै)

द्वन्द्वस्योभयपदार्थप्रधानत्वेनानुपसर्जनत्वादाह

समासार्थे इति। (कै)

उद्भूतावयवभेदसमूहः समासार्थः। तत्रावयवी च प्रधानमित्यर्थः॥ नन्वेवमपि शास्त्रीयोपसर्जनत्वाभावात् कथं प्राप्तिरत आह

प्रथमेति॥ (कै)

परे तु अत्रैकविभक्तीत्युपसर्जनत्वं समासोपेक्षया च तत्र नियतविभक्तिकत्वं द्वन्द्वस्य प्रथमान्तानामेव न परिनिष्ठितविभक्त्या वाक्ये प्रत्येकमेव कर्मत्वकरणत्वाद्यवगत्यासमासे च समुदाये एव तदवगत्या-समाससमानार्थत्वाभावेन तस्य वाक्यत्वासम्भवात्। अत एव यदग्नये च प्रजापतये च इत्यादौ वाक्ये प्रत्येकमेव देवतात्वमग्नीषोमावित्यादौ

प्रधानमुपसर्जनमिति च सम्बन्धिशब्दावेतौ। तत्र सम्बन्धादेतद्गन्तव्यम् यं प्रति यदप्रधानं तस्य चेत् सोऽन्तो भवतीति। अवश्यं चैतदेवं विज्ञेयम्। उच्यमानेऽपि हि प्रतिषेध इह प्रसज्येत। पञ्चकुमार्य्यः प्रिया अस्य पञ्चकुमारीप्रियः। दशकुमारीप्रिय इति॥ कपि च। वा। कपि च प्रतिषेधो वक्तव्यः। बहुकुमारीकः। बहुवृषलीकः (५। ४। १५३)॥ द्वन्द्वे च। वा। द्वन्द्वे च प्रतिषेधो वक्तव्यः। कुक्कुटमयूर्य्यौ॥ उक्तं वा। वा। किमुक्तम्। कपि तावदुक्तं "न कपि" (७। ४। १४) इति

समासे च समुदितस्यैवेति व्यवस्था सिध्यति ध्वनितं चेदं "[1]न ङिसम्बुद्ध्योः" इति सूत्रे भाष्ये इति तत्रैव निरूपयिष्याम इत्याहुः॥

प्रियं ग्रामणि इति। (भा)

तस्य नपुंसकत्वप्रदर्शनाय ब्राह्मणकुलमित्यस्योपन्यासः। अत्र नपुंसकह्रस्वत्वस्यापि निषेधः स्यादित्यर्थः। प्रकल्प्य चापवादविषयमिति न्यायेन पूर्वमपि ह्रस्वो न स्यादिति तात्पर्य्यम्॥

समासान्त इतीति। (कै)

कवन्तरङ्गतर इति वक्ष्यमाणोभिप्रायः॥

बहुयवागूक इति। (कै)

यवागूशब्दो दीर्घान्त इति "ऊङुतः" (४।१।६६) इत्यस्याप्राप्तेः। स न स्त्रीप्रत्ययान्त इति भावः॥ विशेषापेक्षस्यावहिरङ्गत्वेऽप्याह

नद्युत्तरपदमिति॥ (कै)

ननु द्वयोः स्पर्धमानयोरेकस्य बहिरङ्गत्वेतदपेक्षमन्यस्यान्तरङ्गत्वमिति प्रकर्षाभावादातिशयिकोऽयुक्तोऽत आह

---

१ अ ८। पा २। सू ८॥

प्रतिषेध इति। नैतदस्त्युक्तम्। "केऽणः" (७। ४। १३) इति या ह्रस्वप्राप्तिस्तस्याः प्रतिषेधः। कुत एतत्। अनन्तरस्य विधिर्वा भवति प्रतिषेधो वेति। अवश्यं चैतदेवं विज्ञेयम्। यो हि मन्यते या च यावतीं ह्रस्वप्राप्तिस्तस्याः प्रतिषेध इतीहापि तस्य प्रतिषेधः प्रसज्येत। प्रिय ग्रामणिब्राह्मणकुलमस्य प्रियग्रामणिकः। प्रियसेनानिकः॥ इदं तर्ह्युक्तम्

परेति। (कै)

यदि भवान् ह्रस्वत्वमन्तरङ्गं मन्यते तदा ततोऽप्यन्तरङ्गतरः कबित्यर्थः॥

ततश्चावयवापेक्षत्वादिति। (कै)

समासशब्देन तदर्थमुत्तरपदं लक्ष्यत इति भाव इति कश्चित्। वस्तुतस्तु समासार्थं विग्रहवाक्यं लक्ष्यत इति भाष्याशयः। तथैवान्यत्र दृष्टत्वात्। येषां पदानां समासो न तावत्तेषामन्यद्भवतीति वाक्यशेषस्वारस्याच्च। एवं चान्तरङ्गतरत्वं स्पष्टमेव कैयटेऽप्यवयवापेक्षत्वादित्यस्यावयवगतप्रातिपदिकसंज्ञापेक्षत्वादित्यर्थः। समासान्तविधायकानां च तत्तत्समासार्थविग्रहवाक्यान्तावयवः शरदादिप्रातिपदिकात् परः प्रत्ययः इत्यर्थ इति भावः॥ "समुदायापेक्ष" इत्यस्य च समुदायगतप्रातिपदिकापेक्ष इत्यर्थः ("पर" इत्यारभ्य "इत्यर्थः" इत्यन्तं नास्ति क पुस्तके)। एवं च समाससंज्ञापेक्षसमुदायगतप्रातिपदिकत्वात् पूर्वमेव समासान्त इत्यन्तरङ्गतर इति भावः। "अन्तः" (६।२।१४३) इति सूत्रस्थभाष्यात् समासावयवत्वस्यैव प्रतीतेः। न तावत्तेषामिति कपः प्रथममित्यर्थः॥

अन्यत् (भा)

समासशास्त्रम्। कबन्तादिति। तच्छास्त्रवैयर्थ्यभिया तद्भवनकालं

कपि कृतेऽनन्तत्वाद् ह्रस्वत्वं न भविष्यति। इदमिह सम्प्रधार्य्यम्। कप् क्रियतां ह्रस्वत्वमिति किमत्र कर्त्तव्यम्। परत्वात् कप्। अन्तरङ्गं ह्रस्वत्वम्। अन्तरङ्गतरः कप्। ननु चायं कप् समासान्त इत्युच्यते। तादर्थ्या-

प्रतीयत इत्यर्थः। अन्यथा समासघास्तस्य कबपेक्षत्वेन तद्धतौ-चोक्तेरसङ्गतिः। एवं च कपा समकालं तत्पूर्वभागस्य समाससंज्ञा कपस्तद्वाक्यान्तावयवत्वेन समासप्रातिपदिकावयवत्वात् स्त्रीप्रत्ययस्य तदन्तत्वाभाव इति भावः॥

प्राधान्यादिति। (कै)

इदं "परवल्लिङ्गम्" (२।४।२६) "चार्थेद्वन्द्वः" (२।२।२९) इति सूत्रे भाष्यविरोधात् "द्वन्द्वे च प्रतिषेधः" इति वार्त्तिक-विरोधाच्च चिन्त्यम्। तस्माद्वचनारम्भ एव ज्यायान्। ध्वनितं चेदम् अन्वर्थत्वमुक्त्वा "द्वन्द्वे चेति" निषेधं वदता दूषयिष्यमाणसमाधा-नोक्त्या च भगवतेति बोध्यम्॥

शब्दशब्दार्थाविति। (भा)

परिहारस्तु परमयुवतिरित्यादौ तिप्रत्ययद्वयापत्त्या तत्रैव भाष्ये दूषित इति दिक्

ताच्छब्द्यं भविष्यति। येषां पदानां समासो न तावत्तेषामन्यद्भवति कथं तावत् प्रतीयते॥ द्वन्द्वेऽप्युक्तम्। किमुक्तम्। "परवल्लिङ्गमिति शब्द-शब्दार्थौ" (वा—२। ४। २६) इति। तत्रौपदेशिकस्य ह्रस्वत्वमाति-देशिकस्य श्रवणं भविष्यति॥

[1]लुक् तद्धितलुकि ।१।२।४९॥

ननु "उपसर्जनस्य" इति अत्र वर्त्तते तत्र अवन्तिभ्यां "वृद्धेत्" (४।१।१७१) इति "अङः" कुरोः "कुर्वादिभ्यः" (४।१।१७२) इति "ण्यस्य" च तद्राजस्य "स्त्रियामवन्ति कुन्तिकुरुभ्यश्च" (४।१।१७६) इति लुकि "इतो मनुष्य" (४।१।६५) इति "ऊङुतः" (४।१।६६) इति च ङीबूङोः कृतयोः स्त्र्यपत्यवृत्तौ स्त्रीप्रत्ययान्तस्यानुपसर्जनत्वात्तद्धितलुगनन्तरं स्त्रीप्रत्ययोत्पत्तेस्तत्परत्वाभावाच्च कथं लुक् प्राप्तिरत आह

अवन्तीत्यत्रेति । (कै)

उपसर्जनसम्बन्धिस्त्रीप्रत्ययस्य लुगित्यर्थस्तद्धितलुकीति च सत् सप्तमी इत्याशयेन चोद्यमिति भावः॥ नास्ति लुक्परो यस्मात् स्त्रीप्रत्ययादित्यलुक्परत्वादित्यस्यार्थः॥

---

१ तद्धितलुक्यवन्त्यादीनां प्रतिषेधः । वा । तद्धितलुक्यवन्त्यादीनां प्रतिषेधो वक्तव्यः । अवन्ती कुन्ती कुरूः॥ तद्धितलुक्यवन्त्यादीनामप्रतिषेधोऽलुक् परत्वात् । वा । तद्धितलुक्यवन्त्यादीनामप्रतिषेधः । अनर्थकः प्रतिषेधोऽप्रतिषेधः। लुक् कस्मान्न भवति । अलुक् परत्वात् । लुकीत्युच्यते न चात्र लुकं पश्यामः॥ लुकीति नैषा परसप्तमीशक्या विज्ञातुं न हि लुका पौर्वापर्य्यमस्ति । का तर्हि । सत्सप्तमी । लुकि सतीति । सत्सप्तमी चेत् प्राप्नोति॥ एवं तर्हीदमिह व्यपदेश्यं सदाचार्य्यो न व्यपदिशति । किम् । उपसर्जनस्येति वर्त्तते । न च जातिरुपसर्जनम्॥

कृते इति। (कै)

एवं च न तत्परत्वं ङ्यादेरिति भावः॥ कथं तर्हि वार्त्तिककृता लुक्परत्वादित्युक्तं तत्राह

बुद्धीति॥ (कै)

उपसर्जनसम्बन्धिन इत्यर्थान्न च जातिरुपसर्जनमित्ययुक्तमत आह

उपसर्जनेति। (कै)

सम्भवति सामानाधिकरण्ये वैयधिकरण्यमन्याय्यमिति भावः॥ इह लुग्विधायके

स्त्रीत्वयुक्ता प्राधान्येनेति। (कै)

एवं च प्रधानजातिगतस्त्रीत्वाभिधायीप्रत्ययो नोपसर्जनमिति भावः॥ स्वयं लुगभावे हेत्वन्तरमाह

अप्रातिपदिकत्वाच्चात्र ह्रस्वाभाव इति। (कै)

अत्रावन्तीत्यादौ ह्रस्वपदेन ह्रस्वप्रयोजको लुगुच्यते ङीलुकि हि अवन्तिरिति ह्रस्वमवतिष्ठत इति तत्प्रयोजकता लुको बोध्या। तद्धितलुकि (तद्धितान्तात् स्त्रीलुकि इत्यधिकम् क पुस्तके) स्त्रीप्रत्ययान्तप्रातिपदिकावयवस्य प्रत्यासत्त्या स्त्रीप्रत्ययस्य लुगिति सूत्रार्थः प्रकृते च न तत्त्वम्। तद्धितान्तात् स्त्रीप्रत्ययोत्पत्तेरिति भावः॥ "गोस्त्रियोः" (१।२।४८) इति ह्रस्वस्य तु नात्र प्राप्तिः। तत्र शास्त्रीयोपसर्जनस्य ग्रहात्। यथा चैतत्तथोपपादितम्। क्वचित्तु लुगभाव इत्येव पाठः॥ नन्वेवं कथम् "आमलकम्" इत्यादौ लुगत आह

आमलेति॥ (कै)

तद्धितान्तत्वादिति। (कै)

मयटो लुकि प्रत्ययलक्षणेनेति भावः॥ ननु लिङ्गविशिष्टपरिभाषया प्रातिपदिकग्रहणानुवृत्तावप्यवन्तीत्यत्र दोषोऽत आह

लिङ्गेति। (कै)

लिङ्गविशिष्टस्योपादानेऽपि तत्परिभाषाप्रवृत्तौ बाधकाभावेन भाष्योक्तसमाधिरेव युक्त इति बोध्यम्॥

---

[1]इद् गोण्याः।१।२।५०॥

पञ्चभिर्गोणिभिः क्रीतः इति द्विगौ क्रीतार्थठको लुकि "लुक् तद्धित" (१।२।४९) इति लुगपवादभूतमिदं सूत्रम्। तत्रानेन लुको निषेधे एकविभक्तीत्युपसर्जनत्वाद् ह्रस्वेन सिद्धे इद् ग्रहणं व्यर्थमिति बोध्यम्। समाधत्ते भाष्ये

इति वा वचने तावदिति। (भा)

इच्छब्दोक्तौ न शब्दोक्तौ च तावदेव न तु मात्राप्यधिकेति तदर्थः। "लुकि"। स्त्रीप्रत्ययलुकि॥

---

१ इद्गोण्या नेति वक्तव्यं ह्रस्वता हि विधीयते।
इति वा वचने तावन्मात्रार्थं वा कृतं भवेत्॥ १॥
गोण्या इत्त्वं प्रकरणात् सूच्याद्यर्थमथापि वा॥

सिध्यत्येव ह्रस्वत्वमिति। (कै)

गोवस्क्रयणीत्यादौ ह्रस्ववारणाय शास्त्रीयोपसर्जनस्यात्र ग्रहा-च्चिन्त्यमिदम् भाष्यन्तु यथाश्रुतं रमणीयमेव॥

तदापि प्रथमेति। (कै)

"[१]प्रस्थादिभ्यः" परिच्छेदकवाचिभ्यः प्रमेयविवक्षायां प्रथमां बाधित्वा तद्धितः प्राप्नोति तदविवक्षायां प्रातिपदिकार्थत्वादेव सिध्यतीति व्यर्थं तदित्याशङ्क्य तद्धितमन्तरेणापि "यदा परि-माणे"त्यादि प्रातिपदिकार्थसूत्रे वक्ष्यतीति भावः॥ न चानुप-सर्जनत्वादित्वमपि न प्राप्नोति तस्येहासंबन्धादिति भावः॥

अभेदोपचारेणेति। (कै)

गोण्येव व्रीहय इत्याहार्य्य बुद्ध्या गोणीशब्दस्य प्रमेयवृत्तितया लाक्षणिकत्वेनानुपसर्जनत्वमित्यर्थः॥ तत्र शङ्कते

सर्वत्र तर्हीति॥ (कै)

तेन यत्रेति। (कै)

लाक्षणिकस्याप्युपसर्जनत्वं मन्यते। एवं हि गोणीपदलक्षणाया-मपि ह्रस्वापत्तेश्चिन्त्योऽयं कैयटः। तर्हि ह्रस्वत्वेनैव सिद्धे व्यर्थ इद्विधिः स्यादत आह

ह्रस्वत्वं त्विति॥ (कै)

अप्रातिपदिकत्वादिति। (कै)

गोणीशब्दस्य ङ्यन्तत्वादिति भावः। प्रातिपदिकग्रहणे लिङ्ग-

---

१ ते इत्यधिकम्। इ॥

विशिष्टस्यापि ग्रहा“दप्रातिपदिकत्वादि”ति चिन्त्यम् । ननु लुका विच्छिन्नत्वात् कथं ह्रस्वानुवृत्तिरत आह

गोस्त्रियोरिति ॥ (कै)

लुगपवाद (कै)

इत्यनेनोपसर्जनस्येत्यनुवृत्तिं दर्शयति

तच्च ह्रस्वमिष्यते इति । (कै)

तच्च न सिध्यतीति शेषः ॥ [1]इत् ग्रहणे यथा सिध्यति तदाह

योगेति ॥ (कै)

इद् इति (भा)

एको [2]गोलुगपवादार्थः ॥

गोण्या इति । (भा)

द्वितीयस्तस्यासार्वत्रिकत्वायेति नातिप्रसङ्ग इति भावः ॥ ननु अस्य लुगपवादत्वे यत्र प्रमेयलक्षणया गोणीशब्दप्रयोगस्तत्र लुगभावादित्वमपि न स्यादत आह

गोण्यौरिति ॥ (कै)

लोपेनेति । (कै)

लुकेत्यर्थः ॥ एवं च कैयटस्य पूर्वापरविरोधोऽपि द्रष्टव्यः । अत्र पक्षे लक्षणाया गोणी इति दीर्घान्तस्यैव दृष्टत्वादित्याहुः ॥

---

१ इतो । क ॥ २ यो । इ ॥

[1]लुपियुक्तवद्व्यक्तिवचने।१।२।५१॥

पदार्थानवगमे तद्भावत्त्यावगन्तुं न शक्यतेऽतः सूत्रार्थमाह

प्रकृतीति। (कै)

युक्तशब्देन प्रकृत्यर्थ उच्यते स हि प्रत्ययार्थेन युक्तो भवति। प्रकृतौ यादृशं लिङ्गसंख्याप्रयुक्तं कार्य्यं तत्प्रत्ययार्थप्रतिपादिकायां तत्रातिदिश्यते इति तात्पर्य्यं व्यक्तिर्लिङ्गं वचनं संख्या॥ न च पुष्पः फलवान् वनस्पतिः। तथा च शिरीषस्य कथं वनस्पतित्वं यद् ग्रामेऽतिदिश्येतेत्यत आह

फलीति॥ (कै)

अस्यापुष्प इत्यादिः। फलाभावेऽपि इत्यस्यापुष्पफलाभावेऽपीत्यर्थः। यद्वा शिंवीनां फलत्वाभावं मन्यते। एवं च वनस्पतिशब्देन वृक्ष एवोच्यत इति भावः॥ [2]षष्ठ्याश्च प्रकृत्यर्थधर्मत्वाभावात् कथमतिदेशोऽत आह

प्रकृत्यर्थेति॥ (कै)

व्यतिरेकस्य (कै)

सम्बन्धस्य॥ शष्ठ्या एव प्रसङ्गे हेतुमाह

---

१ प्रागपि वृत्तेर्युक्तं वृत्तं चापीह यावता युक्तम्।
वक्तुश्च कामचारः प्रागवृत्तेर्लिङ्गसंख्ये ये॥

२ षष्ठ्याः। इ॥

तत्रेति। (कै)

युक्तशब्देन प्रकृतिस्तद्वल्लिङ्गमेकवचनादिप्रत्ययाश्च लुपि सति भवन्तीति सूत्रार्थः। अर्थशब्दयोरभेदाच्च लिङ्गस्य प्रकृतिनिष्ठत्वमेवं चोपस्थितत्वात्तस्या एवातिदेशः प्राप्नोतीति भावः॥ ननु वचनमिति पारिभाषिकसंज्ञाभावात् "नेदम्" इत्यसङ्गतमत आह

एकवचनादीति॥ (कै)

अनुनिष्पादीति। (कै)

नान्तरीयक इत्यर्थः॥ भाष्ये

अन्वर्थेति। (भा)

लौकिकः संख्यारूपोऽर्थो वचनशब्देनोच्यत इति भावः। अन्वर्थत्वम् अत्र लोकप्रसिद्धार्थत्वम्॥ नन्वेवं षष्ठ्यप्युच्यते इति अनुपपन्नमत आह

षष्ठीशब्देन चेति॥ (कै)

ननु लुपो भावस्य कथमभिधायकत्वं किं च लुपा दूरभवार्योक्तावपि षष्ठ्यर्थस्य कथमुक्तिरत आह

लुप् सहचरितेनेति। (कै)

तेन हि [१]स्वसम्बन्ध्यदूरभव उच्यते इति भावः॥ तदाह

अभिहित इति॥ (कै)

व्यतिरेकाभाव इति। (कै)

---

१ स्वसम्बन्ध्यदूरभव इति यावत्। इ॥

[१]भेदनिबन्धनसम्बन्धत्वाभाव इत्यर्थः। शेषत्वाय इति यावत्। कारकप्रातिपदिकार्थव्यतिरिक्तो हि शेषः॥ षष्ठ्यतिदेशाभावेन आतिदेशिकीत्ययुक्तमत आह

संख्यायामिति। (कै)

चेत्यर्थः इति। य इयांस्तु विशेषः॥ वाक्ये भिन्नोपस्थिति-विषयतया वृत्तौ चैकोपस्थितिविषयतयेति उत्तरार्थे पक्षान्तरा-प्रतीतेः कामचार इत्ययुक्तमत आह

चशब्द इति। (कै)

तथाच तेन पक्षान्तरद्योतनमस्तीति भावः॥ भाष्ये उक्तश्लोकस्य व्याख्यानं "प्रागपि वृत्तेर्युक्तं वनस्पतिभिः" इत्यादिकामचारविषये एकतरपक्षग्रहणे विनिगमकाभावोऽत आह

प्रत्यासत्त्येति॥ (कै)

तदुक्तं भाष्ये

वृत्ते च युक्तवद्भावो विधीयते इति। (भा)

वृत्तिप्राक्कालावच्छिन्नार्थनिष्ठलिङ्गसंख्ययोरतिदेश उतवृत्ति-कालावच्छिन्नयोरिति संशयः। तत्राद्ये संख्यायाः षष्ठीप्रतिपाद्य सम्बन्धवदर्थनिष्ठत्वात् तादृशयोरेवातिदेशे षष्ठी स्यादिति बोध्यम्। द्वितीयमादायोत्तरं तत्र प्रातिपदिकप्रतिपाद्ये सम्बन्धवदर्थनिष्ठत्वात् तादृशयोरेवातिदेशे प्रातिपदिकार्थमात्रत्वात् प्रथमैव। अतिदेशस्य वृत्तिनिष्ठत्वात् तद्गतयोरेवातिदेशे एकनिष्ठत्वं प्रत्यासक्तिरिति

---

१ "व्यतिरेकाभाव" इत्यारभ्य "यावत्" इत्यन्तं नास्ति इ पुस्तके॥

बोध्यम् ॥ ननु वृत्तावुपसर्जनार्थस्य संख्याभेदानवगतेः कथं तत्काला-वच्छिन्न तदतिदेशोऽत आह

वृत्ता उपेति । (कै)

आदेशात् "तवकममकावेकवचन" इति विहितात् तत्र सम्बोध्यत्वादिनैकस्यैवोपस्थितिर्नत्वेकत्वेनेति तत्त्वम् ॥

तथेहेति । (कै)

शिरीषा ग्राम इति बहुवचनात् तत्प्रकृत्यपि शिरीषत्वेनाने-कोपस्थितिर्न तु बहुत्वेनेति तत्त्वम् अन्यथातिदेशाप्राप्त्या तदनुप-पत्तिरिति भावः ॥ ननु संख्यातिदेशेऽपि तन्निबन्धना षष्ठी कस्मा-न्नेत्यत आह

वृत्तावुपसर्जनमिति ॥ (कै)

व्यतिरेकाभावादिति । (कै)

तदतिदेशस्तु न मानाभावादिति भावः ॥

अथवा प्राग् वृत्तेरिति । (कै)

इदमयुक्तं प्रत्यासत्तिबाधापत्तेरित्याहुः ॥ ननु तद्धितार्थस्यैकत्वा-देकवचननिवृत्तयेऽवश्याश्रयणीयोऽतिदेशोऽत आह

अन्तरेणापीति ॥ (कै)

[1]भाष्यवार्त्तिकयोगाप्रयोगयोर्बीजमाह

अभेदमिति ॥ (कै)

---

१ भाष्यवार्त्तिकयोर्वतिप्रयोगाप्रयोगयोर्बीजमाह । क ॥

लिङ्गसंख्ययोरिति । (कै)

विशेष्यमात्रगतलिङ्गसंख्ययोर्विशिष्टगतलिङ्गसंख्ययोश्चेत्यर्थः ॥

पठितमिति । (कै)

अभिधेयस्य व्यक्तीति पठितमित्यर्थः ॥

वतिनेति । (कै)

[1]विशेष्यमात्रवाचकयल्लिङ्गसंख्याप्रयुक्तं कार्य्यं दृश्यते तद्देवान्यत्र विशिष्टवाचकेऽपि दृश्यते तथा प्रकृतेऽपि स्यात् तद्वारणार्थं सूत्रमिति भावः ॥ अभिधेयं विशेष्यं अभिधानशब्दस्य वाचकपर्य्यायत्वादभिधानवदित्ययुक्तमत आह

उपसर्जनमिति ॥ (कै)

तत्र योगं दर्शयति

तेन हीति ॥ (कै)

प्रधानार्थः । (कै)

तदा स्कन्दितस्यार्थः ॥

तस्य चेति । (कै)

त्रिलिङ्गोऽयं शब्द इत्यादिप्रयोगदर्शनादिति भावः ॥ भाष्ये

लुपोऽदर्शनसंज्ञित्वादिति । (भा)

लुपः लुप्शब्दस्य ॥ ननु लुपीत्यनेन प्रत्ययार्थो वाच्य इत्यत आह

---

१ विशेष्यमात्रवाचके । ड ॥

अदर्शनसंज्ञित्वादिति। (भा)

बहुव्रीहिः ॥

न वाऽदर्शनस्येति। (भा)

लुवर्थादर्शनस्येत्यर्थः ॥ अशक्यत्वे हेतुमाह

अभावेति। (कै)

स्वरूपसद्भावे शब्दावाच्येऽतिदेशो शक्य इति भावः ॥

साहचर्य्यादिति। (भा)

लुप्शब्देन लुपो यः स्थानी प्रत्ययस्तदर्थो लक्ष्यते युक्तार्थस्य लिङ्गसंख्ये लुप्स्थानिप्रत्ययार्थेऽतिदिश्येत इति तात्पर्य्यम् ॥

युक्तः (कै)

सम्बन्ध इति ॥ "प्रकृत्यर्थ" इत्युच्यते। तत्र केन युक्त इत्याकाङ्क्षायां उपस्थितत्वाल्लुवर्थस्यैव सम्बन्धः स्याद् न च तदर्थादर्शनेन कस्यचिद् योग इति युक्तपदार्थाप्रसिद्धिरतोऽपि तत् स्थानिप्रत्ययार्थत्वालाभ इत्यर्थलाभ इत्यर्थकं भाष्ये

योगाभावाच्चेति ॥ (भा)

ननु एवमपि उद्भूतावयवसमूहस्यैव द्वन्द्वार्थत्वेन द्विवचनमेव स्यादिति बहुवचनसिद्ध्यर्थोऽतिदेशः स्यादत आह

वर्त्तिपदेति ॥ (कै)

मधुरा पञ्चाला इति (भा)

भाष्ये उदाहृतत्वादिह समासशब्देनेतरेतरद्वन्द्व एवाभिधीयते।

उत्तरसंख्याया पूर्वसंख्याबाधादतिदिष्टसंख्यामादाय बहुवचनं लुबन्तस्य पूर्वपदत्वेऽतिदेशाभावाद्द्विवचनमेवेति भावः॥

अत एव (कै)

वर्त्तिपदार्थप्राधान्यादेव समासे बहुवचनान्तप्रकृतिकलुबन्तार्थे चेदतिदेशस्तदोत्तरपदस्यैवेति वार्त्तिकार्थो न तु उत्तरपदस्य चेद्बहुवचनान्तस्यैवेत्यर्थ इति भावः। बहुवचनग्रहणं तु अबहुवचनान्तलुबन्त पूर्वपदस्य नियमेन व्यावृत्तिर्माभूदिति तेन गोदमधुरा इति भवति न तु गोद मधुरे इतीत्याहुः॥

विशेषणानां चाजातेः। १। २। ५२॥

परिच्छेदकमत्र विशेषणं तत्रासमस्ताया जातेर्विशेषणानामित्यनेन कथमन्वयोऽत आह

असमर्थेति। (कै)

एवं च नञ इवोत्तरपदार्थस्याप्यन्यत्रान्वयो न दोषायेति भावः। पूर्वसूत्रेण प्रकृत्यर्थगतलिङ्गसंख्ययोर्लुबर्थेऽतिदेशात्तद्विशेषणानामपि सिद्ध एवातिदेशः। लुबर्थविशेषणानां स्वविशेष्यगतलिङ्गवचनयोरुचितत्वात्। सूत्रं तु जातिप्रतिषेधार्थं तत्र सन्देह इति तात्पर्य्यम्। भाष्ये

सुभिक्ष (भा)

इत्यादि ॥

न सिध्यतीति। (भा)

तेषां जनपदविशेषणत्वेऽपि तद्द्वारा लुबन्तविशेषणस्यापि सत्त्वेन बहुवचनमेव स्यादीदृशविशेषणेषु विध्यर्थमेव विशेषणानामित्यंशः स्यादित्याशयः ॥

यदा तु जातिः प्रक्रम्यते इति। (कै)

अत एव पञ्चालाः सुभिक्षा जनपद इति पञ्चाला जनपदः सुभिक्ष इत्येव च भवति जातौ प्रक्रान्तायां यद्विशेषणमुपनिपतति तं तज्जातिमेव साक्षाद्विशिनष्टीति भावः। "विशेषणानाम्" इत्यनेनापि साक्षाल्लुबर्थविशेषणग्रहणमेवोचितमिति तात्पर्य्यम् ॥ जातिगुणसमभिव्याहारे जातेर्विशेष्यत्वनियमादाह

विशेष्यत्वेन वेति ॥ (कै)

शङ्कते भाष्ये

[१]अथ किमर्थपुनरिदमिति। (भा)

"विशेषणानामि"त्येतदित्यर्थः ॥ उत्तरयति

[२]जातिनिवृत्त्यर्थ इति ॥ (भा)

---

१ उपलब्ध भाष्य पुस्तकेषु 'अथ' इति नास्ति ॥

२ किमर्थपुनरिदमुच्यते। विशेषणानां वचनं जातिनिवृत्त्यर्थम्। वा ॥

विशेषणानामिति । (भा)

सुभिचादीनामित्यर्थः ॥

[1]समानाधिकरणत्वादिति । (भा)

अर्थस्य युक्तवद्भावे तदर्थाभिन्ने अनियतलिङ्गसंख्ये सर्वत्र सिद्ध-मिति तात्पर्य्यम्। अन्यत्रापि जातेर्युक्तवद्भावोनेति विशेष्यलिङ्गादि-ग्राहिता नेत्यर्थः ॥

हृक्षोपनिपातेत्विति । (कै)

वदरीवृचो मधुर इति यथा ॥ एवं प्रकृतेऽपि रूपद्वये सिद्धे व्यर्थं सूत्रमिति भावः ॥ पृच्छति

किं पुनरिति ॥ (भा)

उत्तरयति

[2]आविष्टेति ॥ (भा)

ननु जातेर्लिङ्गाश्रयत्वाल्लिङ्गाविष्टाजातिरिति वक्तव्ये विपरीतो-च्चारणमयुक्तमत आह

आविष्टमिति । (कै)

विशिष्यगृहीतमित्यर्थः ॥ एवं व्युत्पत्तौ जातेर्नियतलिङ्गोपा-दानत्वेन तत्त्वं प्रतीयत इत्याह

नियतेति । (कै)

---

१ समानाधिकरणत्वात् सिद्धम् । वा ॥

२ किं पुनः कारणमन्यत्रापि जातेर्युक्तवद्भावो न भवति । आविष्टलिङ्गा जातिर्यल्लिङ्गमुपादाय प्रवर्त्तते उत्पत्तिप्रभृत्या विनाशान्न तल्लिङ्गं जहाति ।

यद्यपि जातिशब्दा अनियतलिङ्गा अपि दृश्यन्ते तथापि प्रकृताभिप्रायमेतत्॥ ननु सर्वत्र सर्वलिङ्गसत्त्वात् कथं नियतलिङ्गत्वमत आह

सर्वत्रेति॥ (कै)

शब्दव्यवहारगताविति। (कै)

व्यक्तिगतेति नोक्तं व्यक्तेरपि कस्यास्चिन्नित्यत्वात्। अत एव शब्दगतेति नोक्तम्। जातिरित्युपलक्षणम्। नियतलिङ्गशब्दमात्रार्थस्य भाविन इति। भाविबुद्धिविषयस्येत्यर्थः॥

गुणवचनानामिति। (भा)

[1]जातिक्रियादिभिन्नानामित्यर्थः॥ तेन शक्यं च श्वमांसेन क्षुदुपहन्तुम् इत्याद्युपपन्नं गुणाभेदेनगुणोपसर्जनगुणिबोधकानामाश्रयत आश्रयविशेषतो लिङ्गादिकमित्यर्थः। [2]अयं भाष्यकृत् कृतः सूत्रार्थः॥

तन्निष्ठत्वादिति। (कै)

तन्निष्ठत्वेन ग्रहादित्यर्थः॥

यदा तु जातीति। (कै)

यथा बदरीवृत्त इत्यादाविति भावः॥ [3]मनुष्यलुपीत्यस्य युक्तवद्भाव (१।२।५१) प्रतिषेधत्वे "चञ्चा" इत्यसङ्गतमित्यत आह

विशेषणानामिति। (कै)

लुबन्तस्य तु भवत्येवेति भावः॥

---

१ जातिक्रियाभिन्नामित्यर्थः। ड॥

२ 'अयं' इत्यारभ्य "सूत्रार्थः" इत्यन्तं नास्ति। ड पुस्तके॥

३ मनुष्यलुपि प्रतिषेधः। वा। मनुष्यलुपि प्रतिषेधो वक्तव्यः। चञ्चाभिरूपः। वध्रिका दर्शनीयः॥

अभिधेयाश्रय इति। (कै)

विशेष्यगतं यत्युक्तवद्भावेन लिङ्गं विशेषणे प्राप्तं तस्यायं उपस्थितत्वात् निषेध इति विशेष्यभूतार्थगतं पुंलिङ्गमत्र भवतीति भावः। एतेन "मनुष्य लुपि" इत्यनेन विशेषणानां विशेष्यगतलिङ्गादिनिषेध इति[1] ॥ [2]"अभिरूप" इत्यत्र भाष्यकारवचनादेव पुंस्त्वमिति बोध्यमित्यपास्तम् ॥

---

[3]तदशिष्यं संज्ञाप्रमाणत्वात्।१।२।५३॥

तत् (भा)

युक्तवद्भावशास्त्रम् ॥ भाष्ये

कृत्रिमा इति। (भा)

शास्त्रकृता बोधितसङ्केता इत्यर्थः ॥ कृत्रिमसंज्ञाग्रहणे हेतुमाह

---

१ वार्त्तिककृता सूत्रार्थस्योक्तत्वेन तस्यैवायं निषेध इति उभयोरपि विशेष्यगतलिङ्गयोर्निषेधः। इत्यस्ति इ पुस्तके ॥

२ चञ्चाभिरूप इत्यत्र ॥

३ किं या एताः कृत्रिमाष्टिघुभादिसंज्ञास्तत्प्रामाण्यादशिष्यम्। नेत्याह। संज्ञानं संज्ञा ॥

---

३ किं या एता इति। भा। प्रत्यासत्त्याश्रयेण प्रश्नः। नेत्याहेति। प्रत्यासत्तेः सामर्थ्यं बलवत्। न हि टिघुभादिसंज्ञानां प्रमाणत्वं युक्तवद्भाव-

---

३ "तत्" युक्तवद् वचनम् ॥ "अशिष्यम्" अकर्त्तव्यम्। कुतः संज्ञानां प्रमाणत्वात्। अयं भावः। पञ्चाला वरणा इत्यादयो न यौगिकाः। तन्नि-

प्रत्यासत्तीति ॥ (कै)

सामर्थ्यमिति । (कै)

प्रकरणाल्लिङ्गं बलवदित्यर्थः ॥

अवगम इति । (कै)

भावे ङन्तो यौगिकः संज्ञाशब्द इत्यर्थः ॥ [1]"लुब् योगाप्रख्या-

---

१ लुबप्यशिष्यः । "जनपदे लुप्" (४ ; २ । ८१) "वरणादिभ्यः" (४ । २ । ८२) चेति । कुतः । योगस्यावयवार्थस्येह अप्रख्यानात् । अप्रतीतेः ॥ तथा चात्र "तस्य निवासः" (४ । २ । ६९) "अदूरभवश्च" (४ । २ ; ७०) इति तद्धितो नैवोत्पद्यते किं लुपो विधानेन ॥

शास्त्रस्याशिष्यत्वे हेतुरुपपद्यते सम्बन्धाभावात् । संज्ञानमिति । भा । अव-गमः सम्प्रत्यय इत्यर्थः । तत्र यथाऽऽपो दाराः सिकता वर्षाः इत्युक्ते लिङ्ग-संख्याविशेषावगतिरुत्पद्यमाना प्रमाणम् । एवं पञ्चाला वरणा इत्यादावपि । न च पञ्चालादयो यौगिका अपि तु जनपदादीनां संज्ञास्ततो योगानवगमात् तद्धितो नोत्पद्यते इति लुबपि न वक्तव्यः । तत्र सर्वेषां लिङ्गानां सर्वत्र-भावात् । केन चिच्छब्देन प्रत्याय्यमानं वस्तु कस्य चिल्लिङ्गस्य व्यञ्जकमिति दारादिषु नियतलिङ्गता सिद्धा । बहुत्वमप्यवयवगतं शक्तिगतं चान्यत्र समारोप्यत इति संख्यायोगोऽपि सिद्धः । एकासिकता इत्याद्यपि शिष्ट-प्रयोगदर्शनात् सिध्यति ॥

वासेऽपि देशान्तरे अप्रयोगात् । देशे तन्नाम्नीत्यधिकृत्यादूरभवे प्रत्ययविधा-नाच्च । किन्तु संज्ञाशब्दा एते । ते च यल्लिङ्गसंख्यतया लोके प्रसिद्धास्तत्र प्रमाणभूता एव । तदर्थप्रमाणका इत्यर्थः । यथा आपो दारा वनं गृहाः सिकता वर्षा इत्यादौ नेह शास्त्रेऽनुशासनमारभ्यं तदर्थमपि मास्तु ॥

नात्" (१।२।५४) [1]"योगप्रमाणे च तदभावेऽदर्शनं स्यात्" (१।२।५५) इत्यनयोस्तात्पर्य्यं दृष्टान्तदार्ष्टान्तिकयोरूढ़यौगिकत्वरूपवैषम्यपरिहारं [2]चाह

न चेति। (कै)

एवं च लिङ्गप्रकरणं "जात्याख्यायाम्" इत्यादिसंख्याप्रकरणं च पूर्वाचार्य्यानुरोधेन कृतमिति ध्वनितं सूत्रकृता सर्वं चेदं [3]"कालोपसर्जने च" (१।२।५७) इति न सङ्गृहीतम्॥

योगानवगमादिति। (कै)

संप्रति विनापि क्षत्रिययोगं जनपदे पञ्चालशब्दा व्यवहारदर्शनादित्यर्थः॥

तत्र सर्वेषामिति। (कै)

---

१ चकारो ह्यर्थे। यदि हि योगस्यावयवार्थस्येदं प्रमाणं बोधकं स्यात्तदा तदभावे न दृश्यते। दृश्यते च सम्प्रति। विनैव क्षत्रिययोगं जनपदे पञ्चालशब्दः। न च भूतपूर्व्वगतिः। क्षत्रिययोगद्देशे देशयोगाद्वा क्षत्रिये शब्द इत्यत्र विनिगमकाभावेन वैपरीत्यस्यापि सुवचत्वापत्तेरिति भावः। अतोऽत्रादिवन्नानार्था एवैते इति तत्त्वम्॥

२ 'चाह' इति नास्ति इ पुस्तके॥

३ कालोपसर्जने च तुल्यम्। १। २। ५७। अतीतायाः रात्रेः पश्चार्द्धेन आगामिन्याः पूर्वार्द्धेन च सहितो दिवसोऽद्यतनः। विशेषणमुपसर्जनमित्यादिक्रमेण काल उपसर्जनं च पूर्वाचार्यैः परिभाषितं तत्रापि तुल्यम्। अशिष्यत्वं समानमित्यर्थः। लोकप्रसिद्धत्वादेवेति भावः॥

---

१ प्रधानप्रत्ययार्थवचनमर्थस्यान्यप्रमाणत्वात्। १। २। ५६। प्रत्ययार्थप्रधानमित्येवं रूपं वचनमपि अशिष्यं कुतः अर्थस्य लोकतः एव सिद्धेः। आख्यातस्य क्रिया प्रधानतया व्यभिचाराच्च इत्यर्थः॥

[1]उपचयादिरूपस्य तस्य केवलान्वयित्वादिति भावः॥ "वस्तु" द्रव्यं लिङ्गसंख्याकारकाश्रयत्वं हि द्रव्यत्वमिति तदेव द्रव्यत्वानुपपत्तिपरिहाराय लिङ्गव्यञ्जकं शब्दस्तु करणमिति भावः। एवं च दारपदार्थस्य स्त्रीत्वेऽपि शब्देन उपचयलक्षणं [2]पुंस्त्वमेव व्यज्यते। सर्वेषां सर्वत्र सत्त्वादिति तात्पर्यम्॥

[3]एका सिकतेति। (कै)

अयं प्रयोगो "हयवरट्" (शिवसू-५) सूत्रे भाष्ये एवमन्येऽपि॥ अत्रादिविषयेऽपि शिष्टप्रयुक्ताः माधव इति ध्वनयन् आह

आदीति॥ (कै)

---

[4]जात्याख्यायामेकस्मिन् बहुवचनमन्यतरस्याम्।१।२।५८॥

जातिवादिनो मते जातेरेकत्वात् बहुवचनार्थमावश्यकमितीदमयुक्तमित्यसङ्गतमत आह

---

१ उपचयापचयादि। इ॥

२ पुरुषमेव। क॥

३ 'एका च सिकता' इति 'हयवरट्' सूत्रस्य 'सङ्घातार्थवत्त्वाच्च' इति वार्तिकव्याख्यानावसरे उक्तं भगवता॥

४ इदमयुक्तं वर्तते। किमत्रायुक्तम्। बहवस्तेऽर्थास्तत्र युक्तं बहुवचनम्। तद्यदेकवचने प्राप्तिते बहुवचनं क्रियते एतदयुक्तम्। बहुष्वेकवचनमिति

(जात्याख्यायामेकस्मिन् बहुवचनमन्यतरस्याम् । १। २। ५८ ।)

द्रव्यं त्विति । (कै)

जातेरुपलक्षणत्वं तु शक्यतावच्छेदकतया बोध्यम् । प्रकारान्तरमपि मञ्जूषायां द्रष्टव्यम् ॥ जात्याख्यायां बहुष्वेकवचनमित्यसङ्गतमत आह

अत्र पक्ष इति । (कै)

क्रियादिप्रवृत्तिनिमित्तकास्त तद्व्यावर्त्त्या इति भावः ॥ द्रव्यवादे उत्तरासङ्गतेराह

जातिपदार्थेति ॥ (कै)

नाम वक्तव्यम् ॥ अत उत्तरं पठति । जात्याख्यायां सामान्याभिधानादैकार्थ्यम् । वा । जात्याख्यायां सामान्याभिधानादैकार्थ्यं भविष्यति । यत्तद् व्रीहौ व्रीहित्वं यवे यवत्वं गार्ग्ये गार्ग्यत्वं तदेकं तच्च विवक्षितम् । तस्यैकत्वादेकवचनमेव प्राप्नोति । इष्यते च बहुवचनं स्यादिति तच्चान्तरेण यत्नं न सिध्यतीति जात्याख्यायामेकस्मिन् बहुवचनम् । एवमर्थमिदमुच्यते ॥ अस्ति प्रयोजनमेतत् । किं तर्हीति । तत्रैकवचनादेश उक्तम् । वा । किमुक्तम् । व्रीहिभ्य आगत इत्यत्र "घेर्ङिति" (७। ३। १११) इति गुणः प्राप्नोतीति ॥ नैष दोषः । अर्थातिदेशात् सिद्धम् । वा । अर्थातिदेशोऽयम् । नेदं पारिभाषिकस्य वचनस्य ग्रहणम् । किं तर्हि । अन्वर्थग्रहणम् । उच्यते वचनम् । बहूनामर्थानां वचनं बहुवचनमिति । यावद् ब्रूयादेकोऽर्थो बहुवद्भवतीति तावदेकस्मिन् बहुवचनमिति ॥

संख्याप्रयोगे प्रतिषेधः । वा ।

संख्याप्रयोगे प्रतिषेधो वक्तव्यः । एको व्रीहिः सम्पन्नः सुभिक्षं करोति ॥ अस्मदो नाम युवप्रत्यययोश्च । वा । अस्मदो नाम प्रयोगे च प्रतिषेधो वक्तव्यः ॥ नाम प्रयोगे । अहं देवदत्तो ब्रवीमि । अहं यज्ञदत्तो ब्रवीमि ॥ युवप्रत्ययप्रयोगे । अहं गार्ग्यायणो ब्रवीमि । अहं वात्स्यायनो ब्रवीमि ॥ युवग्रहणेनार्थः । अस्मदो नाम प्रत्ययप्रयोगे नेत्येव । इदमपि सिद्धं भवति । अहं गार्ग्यो ब्रवीमि । अहं वात्स्यो ब्रवीमि ॥ अपर आह । अस्मदः सविशेषणस्य प्रयोगे नेत्येव । इदमपि सिद्धं भवति । अहं पटुर्ब्रवीमि । अहमिष्यं

(जात्याख्यायामेकस्मिन् बहुवचनमन्यतरस्याम् । १। २। ५८ ।)

जात्याख्यायामेकस्मिन्निति । (भा)

यदैकार्थ्यं तद्युक्तं सामान्याभिधानादिति योजना ॥ वार्त्तिकस्य अत्र पक्षे [1]चाह दोषाद्यन्वयी विशेषणीभूता व्यक्तिद्वारकपरम्परया जातावेवेति भावः ॥ अभ्युपगमत्वे हेतुमाह

बहुष्विति । (कै)

अभिन्नस्याभावादिति पाठः। अत एवाभ्युपगमवादोयमिति तात्पर्य्यम् ॥ क्वचि"त्वभिन्नस्य भावाद्" इति पाठः ॥ तदा जात्यङ्गीकारे प्रमाणदर्शनमिदम्। अन्यथा गर्गनिष्ठजनकतानिरूपितजन्यत्वस्य प्रतीति व्यक्तिभेदात्। गार्ग्य इत्यनुगताकारप्रतीतिर्न स्यादिति भावः ॥ नन्वेवं परिमाणभेदाद् द्रव्यभेदे न डित्थत्वादीनामपि जातिशब्दत्वेन तत्रापि बहुवचनं स्यादत आह

एकस्मिन्निति ॥ (भा)

सामर्थ्यमेव दर्शयति

---

१ आह दोहाद्यन्वयी । का ॥

वा बहुवत्पृथक्त्वाभिधानात्। वा। अभिन्नयो वा बहुवद्भावः। किं कारणम्। पृथक्त्वाभिधानात्। पृथक्त्वेन हि द्रव्याण्यभिधीयन्ते। बहुवस्तेऽर्थास्तत्र युक्तं बहुवचनम्। किमुच्यते पृथक्त्वाभिधानादिति यावतेदानीमेवोक्तं जात्याख्यायां सामान्याभिधानादैकार्थ्यमिति ॥ जातिशब्देन हि द्रव्याभिधानम्। वा। जातिशब्देन हि द्रव्यमप्यभिधीयते जातिरपि। कथं पुनर्ज्ञायते जातिशब्देन द्रव्यमप्यभिधीयत इति। एवं हि कश्चिन्महति गोमण्डले गोपालकमासीनं पृच्छति। अस्त्यत्र काचिद् गां पश्यसीति। स पश्यति पश्यति चायं गाः पृच्छति च कां चिदत्र गां पश्यसीति नूनमस्य द्रव्यं विवक्षितमिति। तद्यदा द्रव्याभिधानं तदा बहुवचनं भविष्यति यदा सामान्याभिधानं तदैकवचनं भविष्यति ॥

(अ. १। पा. २। आ. २)

(जात्याख्यायामेकस्मिन् बहुवचनमन्यतरस्याम्। १।२।५८।)

जातिपदार्थेति॥ (कै)

सर्वे शब्दा इति। (कै)

उक्तयुक्त्या याचकादयोऽपि॥ भाष्ये

तच्च विवक्षितमिति। (भा)

प्राधान्येनेति शेषः॥ भाष्ये

व्रीहिभ्य इति। (भा)

सूत्रे एकस्मिन्नित्येकशब्देन एकवचनं गृह्यते। भीमो भीमसेन इतिवत् सप्तमी च षष्ठ्यर्थे इति भावः। सप्तम्युपादानादतिदेश एवेत्युत्तरम्॥ बहूनामर्थानां वचनं [1]बहुवचनमपि भवतीत्यत आह

बहूनामिति। (कै)

कर्मणि ल्युट्। बहूनामर्थानां सम्बन्धियदुच्यते तद्बहुवचनं तच्चोपस्थितत्वाद्बहुत्वमेव॥ तदाह

बहुत्वमेवोच्यते इति। (कै)

एकत्वरूपेऽर्थे शास्त्रीयो बहुत्वरूपार्थस्य तादात्म्येनाहार्य्यारोप इति तात्पर्य्यम्। अत एव तद्विशेषणानामपि सिध्यति॥

एवमिति। (कै)

अन्यथा तत्रापि "तिष्यपुनर्वस्वो" (१।२।६३) इत्यत्र "जसि च" (७।३।१०९) इति गुणः स्यादिति भावः॥ एकशब्दप्रयोगविरोधात् बहुवचनाप्राप्तेराह

एकस्यैवेति। (कै)

---

१ भ्यसादि। इ॥

जातेरेकत्वावगतावेवातिदेशप्रवृत्तेरिति भावः ॥ भाष्ये प्रसङ्गाद् "अस्मदो द्वयोश्च" (१।२।५९) इत्यस्य प्रतिषेधमाह

अस्मदो नामेति ॥ (भा)

ननु द्रव्यपदार्थाश्रयेण प्रत्याख्याने "व्रीहिः सम्पन्न" इति प्रयोगो न स्यादत आह

उभयेति । (कै)

कदाचिद्द्रव्यं प्रधानं कदाचिज्जातिः प्रधानमित्यर्थः ॥ भाष्ये

पृथक्त्वेनेति । (भा)

भेदेनेत्यर्थः ॥

जातिशब्देनेति । (भा)

जातिशब्दाभिमतेनेत्यर्थः ॥ निःशब्दजात्यभिधायकगोत्वादिशब्दे तु नायं विधिरिष्ट इति भावः । तदाह

द्रव्यमपीति । (कै)

प्राधान्येनेति शेषः ॥ तदाह

तच्च कदाचिदिति । (कै)

जातिप्रकारकव्यक्तिविशेष्यक एव शक्तिग्रहः । गौर्गोपदवाच्य इति जातिव्यक्त्युभयविषयकबोधे कारणम् अत एव जातिविशेष्यक-शक्तिग्रहविषयात् गोत्वपदान्न कदापि व्यक्तिबोधः । जातिव्यक्त्यो-रन्यतरस्य विशेष्यताया च पुरुषे चैव नियामिका तात्पर्य्यग्राहकं चैकवचनबहुवचनादि । एतदेवाभिप्रेत्य जातिप्राधान्यद्वन्द्वैकवद्भावो

व्यक्तिप्राधान्ये तु नेति व्यवहार इति भावः। तत्र जातौ व्यक्तेः प्रकारताऽभेदप्रधानतादात्म्ये नेति। न वाह्याद्यन्वयानुपपत्तिः। गोत्वपदजन्यगोत्वबोधे तु भेदप्रधानतादात्म्येति न गोत्वं वाहयेत्यादिप्रयोगः। व्यक्तिद्वारकोऽन्वय इत्यस्याप्ययमेवार्थ इति बोध्यम्॥ भाष्ये

महति गोमण्डल इति। (भा)

अतिनिविड़गोमण्डले अविविक्ततया दृष्टे इत्यमुक्तिः। तत्र जातेरेव शब्दार्थत्वे जातेर्दृष्टत्वात् प्रश्नानुपपत्तिरित्यर्थः॥

---

[1]अस्मदो द्वयोश्च।१।२।५६॥

[2]ननु इन्द्रियाणां स्वातन्त्र्येऽपि एकेन्द्रियसाध्यक्रियायामिन्द्रियान्तराणां कर्त्तृत्वाभावाद् बहुवचनमनुपपन्नमत आह

एकेन्द्रियेति। (कै)

स्वविषयोदासीन्यं संविधातृत्वे हेतुः। "संविधातृत्वं" सहकारित्वम्॥ नन्वेवम् अस्मदः प्रयोगोऽनुपपन्नोऽत आह

शरीर इवेति॥ (कै)

अहङ्कारः (कै)

अहन्त्वप्रतीतिरहङ्कारेण इत्यादिः॥

पारतन्त्र्येति। (कै)

तथाच करणत्वेन विवक्षितत्वात् संविधातृत्वलक्षणकर्तृत्वं नास्ती-

---

१ अयमपि योगः शक्योऽवक्तुम्॥ २ न तु। इ॥

त्यर्थः। उच्चारयितात्मन अहङ्कारास्पदात्मनो वा एकत्वावामि-त्यनुपपन्नमत आह

एकशेषे इति। (कै)

त्यदादीनां यत् परं तच्छिष्यत इति भावः॥

अस्मदोऽर्थद्वयाभिधानादिति। (कै)

अत्र "अस्मद" इति शेषत्वविवक्षया षष्ठीसम्प्रत्ययेति व्यवहार इत्यर्थः। एवं च युष्मदि गुरावेकेषामिति क्वचिद् वृत्तावुच्यमान-मसङ्गत इति भावः। अत एवाचार्य्याः कथयन्तीत्यादिसङ्गच्छते इत्यसेव डित्याः कथयन्तीत्याद्युपपत्तिर्बोध्या। एतदर्थं च प्रत्या-ख्यानप्रकारस्यावश्यकत्वात् सूत्रं प्रत्याख्यातमिति भावः॥

---

[१]फल्गुनीप्रोष्ठपदानां च नक्षत्रे।

१। २। ६०॥

अमायां चन्द्रस्य नष्टत्वात् कथं बहुवचनमित्यत आह

अमेति॥ (कै)

ननु चन्द्रस्य फल्गुन्यादिपदवाच्यत्वाभावात् कथं तमादाय फल्गुन्य इत्यादिप्रयोगोऽत आह

अर्द्धर्चा इति। (कै)

तद्रूपारोपात्तच्छब्दप्रवृत्तिभावः॥ नन्वेवमेकर्क्षविवक्षायामेक-वचनमपि स्यादत आह

---

१ अयमपि योगः प्रत्याख्यातम्॥

---

१ बहुवस्त्वेऽर्था इति। भा। अमावास्यायामप्यादित्यमण्डलं प्रविष्टेन

एकस्यामिति ॥ (कै)

नन्वेवं नक्षत्रान्तरेऽपि चन्द्रसम्बन्धविवक्षायां द्विवचनादिस्यादत आह

सर्वत्रेति ॥ (कै)

अनवस्था। (कै)

अतिप्रसङ्गः ॥

[1]तिष्यपुनर्वस्वोर्नक्षत्रद्वन्द्वे बहुवचनस्य द्विवचनं नित्यम्। १। २। ६३॥

ननु मानवक वाचि द्वन्द्वनिवृत्त्यर्थं तदत आह

तिष्येणेति।

नक्षत्रेण युक्तः काल इत्यणो "लुबविशेषे" (४।२।४) इति लुपि जाते "सन्धिवेला" (४।३।१६) इत्यणः "तिष्य पुनर्वस्वि"ति लुक् यौगिकत्वादिति लोपेनापि अवशिष्टस्य तदर्थान्तर्भावेन शक्तिरेव बोध्यते। अत एव लुबादिप्रत्याख्यानं सूत्रकृतोक्तमिति भावः ॥

अन्तरङ्ग इति। (कै)

कालार्थतद्धितान्तान्माणवकार्थतद्धितोत्पत्तिरिति कालमाणवकयोरन्तरङ्गबहिरङ्गतेति भावः ॥

---

१ छन्दसि पुनर्वस्वोरेकवचनम्। १। २। ६१॥ विशाखयोश्च। १। २। ६२॥ इमावपि योगौ शक्याववक्तुम् ॥

चन्द्रेण नक्षत्राणां योगोऽस्त्येवेति तदापि बहुवचनमर्द्धर्चाः क्वचिन इत्यादिन्यायेन सिद्धम् ॥

(तिष्यपुनर्वस्वोर्नक्षत्रद्वन्द्वे बहुवचनस्य द्विवचनं नित्यम् । १ । २ । ६३ ।)

यथेति । (कै)

द्रव्यकर्मणा क्रियास्वरूपपरिपूरणं कालकर्मणालवगतायाः क्रियायाः कालसम्बन्धपूरणमिति तयोरन्तरङ्गबहिरङ्गता बोध्या ॥

नन्विति । (कै)

अकर्मकग्रहणेन श्रुत्यैव साक्षात्कर्मणि व्यावर्त्यमाने युक्ता पूर्वपश्चात् सम्बन्धसत्त्वेनान्तरङ्गस्यैव व्यावृत्तिः । न त्वेवं प्रकृते अस्य हि स्वार्थसमर्पणद्वारान्यव्यावर्त्तकत्वेनाविशेषादुभयव्यावर्त्तकत्वसम्भवाद् इति भावः ॥ अनत्य अङ्गाधिकारस्थेन कथं सम्बन्धोऽत आह

तिष्येति । (कै)

नक्षत्राण् ततः सप्तम्यां नक्षत्राणीति निर्देशः ॥

यल्लोप इति । (कै)

तच्च पुष्यविशेषणार्थमावश्यकमेवेति भावः ॥

पुनर्नक्षत्रेति । (कै)

तिष्यपुनर्वस्वोः शब्दयोरभिधेये नक्षत्रे वर्त्तमानानां नक्षत्रशब्दानां द्वन्द्व इति सूत्रार्थ इति भावः ॥ ॥

अर्थस्यैवेति । (कै)

तदर्थसम्बन्धिनो बहुत्वस्य द्वित्वातिदेश इत्यर्थः ॥

समासस्येति । (कै)

"कृत् तद्धिते" (१।२।४६) तिसूत्रादिविपरिणतविभक्तिकं समासग्रहणमनुवर्त्यत्यर्थः ॥

नास्तीति (कै)

इत्यन्तेन पूर्वमतदूषणम् ॥ अथ भाष्यं व्याचष्टे

(तिष्यपुनर्वस्वोर्नक्षत्रद्वन्द्वे बहुवचनस्य द्विवचनं नित्यम्। १। २। ५०।)

अवयवेन (कै)

इत्यादिना॥ अवयवार्थकेन वृत्तिपदार्थस्य बोधनमित्यर्थस्तदाह

समुदाय इति। (कै)

उद्भूतावयवभेद इत्यर्थः॥

विपर्य्यासविषया इति। (कै)

यस्तिष्य इत्युपलक्षणम् यौ पुनर्वसू स तिष्यो येषामित्यर्थ-स्यापीति भावः॥ "विपर्य्यासः" भ्रमः॥ "उन्मुग्धा" इत्यस्य च विपर्य्यासेन दृश्यमाना इत्यर्थः॥ अविविक्ततावचनान्मुहे कर्त्तरि क्ते अविविक्ता इत्यर्थादिति भावः॥ भाष्ये

कथं चानेति। (भा)

प्राण्यङ्गादीनामेव समाहारद्वन्द्व इति नियम इति भावः॥

एवं तर्हीति। (भा)

"द्वन्द्वश्च" (२।४।२) इत्यादिषु समाहार एवेति नियमबोधन-द्वारा तद्व्यतिरिक्तसर्वद्वन्द्वस्यानेनोभयरूपता बोध्यते इत्यर्थः। तदाह

अप्राणीति। (कै)

न्यायसिद्धार्थद्योतकत्वेन सर्वशब्दस्य सङ्कोचस्तद्वृत्तितैव युक्तेति भावः। तद्ध्वनयन्नाह

न्यायेति॥ (कै)

एकवद्भावप्रकरणवैपर्थ्यमुद्धरन् न्यायमेव दर्शयति

एकेति॥ (कै)

विषयविभागः। (कै)

विषयनियमः। न तु विधेयद्वन्द्वनियमार्थमिति भावः॥

(तिष्यपुनर्वस्वोर्नक्षत्रद्वन्द्वे बहुवचनस्य द्विवचनं नित्यम् । १। २। ६३ ।)

न त्विति । (कै)

अन्यथात्र बहुवचनग्रहणवैयर्थ्यापत्तिरिति भावः ॥

सिद्ध एवेति । (कै)

चार्थ इत्यनेनेत्यर्थः ॥

न ह्येतेष्विति । (कै)

आपोमयः प्राण इति श्रुतेरद्भिर्विना ग्लायमानप्राणा एव लोके प्राणिन इत्युच्यन्ते इदमेव पूज्यत्वं भाष्ये अत्र भवच्छब्देनोच्यते इति भावः ॥ लोके प्राण इति व्यवहारस्याप्यभावादाह

तदधीनेति । (कै)

एवं च तथा नियमेऽपि नक्षतिरिति भावः। केचित्तु दृष्टानुरोधेन "द्वन्द्वश्च" (२।४।२) इत्यदिषु समाहार एवेति नियमः। एवं चात्रापि पक्षे "जातिरप्राणिनाम्" (२।४।६) इति नित्यैकवद्भावे वचनाभावात् सूत्रमनर्थकं सदुक्तार्थज्ञापकः ज्ञाप्यकोटौ सर्वशब्देनैकवद्भावविषयो जातिद्वन्द्व एव गृह्यते। "द्वन्द्वश्च" इत्यादीनामन्येषां तु नित्यत्वमेवात एवैकवद्भावप्रकरणं पूर्वत्र नित्यार्थमुत्तरत्रव्यभिचारार्थमिति "विभाषा वृक्षमृग" (२।४।१२) इति सूत्रस्थभाष्येण न विरोधः। अत एव मृदङ्गशङ्खतूणवा इत्यादिसङ्गच्छते। यद्वा जातिप्राधान्य एकवचनं व्यक्तिप्राधान्ये बहुवचनमित्युभयमप्यत्र। अत्रैवार्थे इदं ज्ञापकमित्याहुः ॥

इति श्रीशिवभट्टसुतसतीगर्भजनागोजीभट्टविरचिते महाभाष्यप्रदीपोद्योते प्रथमस्य द्वितीये द्वितीयमाह्निकम् ॥

Pariçiṣta Parvan, (Text) Fasc. 1-5 @ /6/ each	Rs. 1	14
Prākṛita-Paingalam, Fasc. 1-6 @ /6/ each	2	4
Prithivirāj Rāsa, (Text) Part II, Fasc. 1-5 @ /6/ each	1	14
Ditto (English) Part II, Fasc. 1	0	12
Prākṛta Lakṣaṇam, (Text) Fasc. 1	1	8
Parāçara Smṛti, (Text) Vol. I, Fasc. 1-8; Vol. II, Fasc. 1-6; Vol. III, Fasc. 1-6 @ /6/ each	7	8
Parāçara, Institutes of (English)	0	12
Prabandhacintāmaṇi (English) Fasc. 1-3 @ /12/ each	2	4
*Sāma Vēda Saṁhitā, (Text) Vols. I, Fasc. 5-10; II, 1-6; III, 1-7; IV, 1-6; V, 1-8, @ /6/ each Fasc.	12	6
Sāṇkhya Sūtra Vṛtti, (Text) Fasc. 1-4 @ /6/ each	1	8
Ditto (English) Fasc. 1-3 @ /12/ each	2	4
Suçruta Saṁhitá, (Eng.) Fasc. 1 @ /12/	0	12
*Taittereya Saṁhitā, (Text) Fasc. 14-45 @ /6/ each	12	0
Tāṇḍya Brāhmaṇa, (Text) Fasc. 1-19 @ /6/ each	7	2
Tattva Cintāmaṇi, (Text) Vol. I, Fasc. 1-9, Vol. II, Fasc. 1-10, Vol. III, Fasc. 1-2, Vol. IV, Fasc. 1, Vol. V, Fasc. 1-5, Part IV, Vol. II, Fasc. 1-12 @ /6/ each	14	10
Trikāṇḍa-Maṇḍanam, (Text) Fasc. 1-2 @ /6/	0	12
Tul'si Sat'sai, (Text) Fasc. 1-5 @ /6/ each	1	14
Upamita-bhava-prapañca-kathā (Text) Fasc. 1-4 @ /6/ each ...	1	2
Uvāsagadasāo, (Text and English) Fasc. 1-6 @ /12/	4	8
Varāha Purāṇa, (Text) Fasc. 1-14 @ /6/ each	5	4
Varsa Krya Kaumudi, Fasc. 1-3 @ /6/	1	2
*Vāyu Purāṇa, (Text) Vol. I, Fasc. 2-6; Vol. II, Fasc. 1-7, @ /6/ each	4	8
Viṣṇu Smṛti, (Text) Fasc. 1-2 @ /6/ each	0	12
Vivādaratnākara, (Text) Fasc. 1-7 @ /6/ each	2	10
Vṛhannāradīya Purāṇa, (Text) Fasc. 1-6 @ /6/	2	4
Vṛhat Svayambhū Purāṇa, Fasc. 1-6	2	4
Tibetan Series.		
Pag-Sam Thi S'iñ, Fasc. 1-4 @ 1/ each	4	0
Sher-Phyin, Vol. I, Fasc. 1-5; Vol. II, Fasc. 1-3; Vol. III, Fasc. 1-5, @ 1/ each	13	0
Rtogs *brjod dpag hkhri* S'iñ (Tib. & Sans.) Vol. I, Fasc. 1-5; Vol. II, Fasc. 1-5 @ 1/ each	10	0
Arabic and Persian Series.		
'Ālamgīrnāmah, with Index, (Text) Fasc. 1-13 @ /6/ each... ...	4	14
Al-Muqaddasi (English) Vol. I, Fasc. 1-3 @ /12/	2	4
Āin-i-Akbarī, (Text) Fasc. 1-22 @ 1/ each	22	0
Ditto (English) Vol. I, Fasc. 1-7, Vol. II, Fasc. 1-5, Vol. III, Fasc. 1-5, @ 1/12/ each	29	12
Akbarnāmah, with Index, (Text) Fasc. 1-37 @ 1/ each	37	0
Ditto English Fasc, 1-6 @ 1/ each	6	0
Arabic Bibliography, by Dr. A. Sprenger	0	6
Bādshāhnāmah, with Index, (Text) Fasc. 1-19 @ /6/ each	7	2
Catalogue of Arabic Books and Manuscripts	1	0
Catalogue of the Persian Books and Manuscripts in the Library of the Asiatic Society of Bengal. Fasc. 1-3 @ 1/ each	3	0
Dictionary of Arabic Technical Terms, and Appendix, Fasc. 1-21 @ 1/ each	21	0
Farhang-i-Rashīdī, (Text) Fasc. 1-14 @ 1/ each	14	0
Fihrist-i-Tūsī, or, Tūsy's list of Shy'ah Books, (Text) Fasc. 1-4 @ /12/ each	3	0
Futūḥ-ush-Shām of Wāqidī, (Text) Fasc. 1-9 @ /6/ each	3	6
Ditto of Āzādī, (Text) Fasc. 1-4 @ /6/ each	1	8
Haft Āsmān, History of the Persian Masnawi, (Text) Fasc. 1 ...	0	12
History of the Caliphs, (English) Fasc. 1-6 @ /12/ each	4	8
Iqbālnāmah-i-Jahāngīrī, (Text) Fasc. 1-3 @ /6/ each	1	2
Iṣābah, with Supplement, (Text) 51 Fasc. @ /12/ each	38	4
Maāṣir-ul-Umarā, Vol. I, Fasc. 1-9, Vol. II, Fasc. 1-9; Vol. III, 1-10; Index to Vol. I, Fasc. 10-11; Index to Vol. III, Fasc. 11-12; Index to Vol. II, Fasc. 10-12 @ /6/ each	13	2
Maghazi of Wāqidi, (Text) Fasc. 1-5 @ /6/ each	1	14

* The other Fasciculi of these works are out of stock, and complete copies cannot be supplied.

	Rs.	
Muntakhabu-t-Tawārīkh, (Text) Fasc. 1–15 @ /6/ each ...	5	10
Muntakhabu-t-Tawārīkh, (English) Vol. I, Fasc. 1–7; Vol. II, Fasc. 1–5 and 3 Indexes; Vol. III, Fasc. 1 @ /12/ each	12	0
Muntakhabu-l-Lubāb, (Text) Fasc. 1–19 @ /6/ each	7	2
Ma'āṣir-i-'Ālamgīrī, (Text), Fasc. 1–6 @ /6/ each	2	4
Nukhbatu-l-Fikr, (Text) Fasc. 1	0	6
Niẓāmī's Khiradnāmah-i-Iskandari, (Text) Fasc. 1-2 @ /12/ each	1	8
Riyāẓu-s-Salāṭīn, (Text) Fasc. 1–5 @ /6/ each	1	14
Ṭabaqāt-i-Nāṣirī, (Text) Fasc. 1–5 @ /6/ each	1	14
Ditto (English) Fasc. 1–14 @ /12/ each	10	8
Ditto Index	1	0
Tārīkh-i-Fīrūz Shāhi of Ẓiyāu-d-dīn Barni (Text) Fasc. 1–7 @ /6/ each...	2	10
Tārīkh-i-Fīrūzshāhi, of Shams-i-Sirāj Aif, (Text) Fasc. 1–6 @ /6/ each...	2	4
Ten Ancient Arabic Poems, Fasc. 1-2 @ 1/8/ each	3	0
Wis o Rāmīn, (Text) Fasc. 1–5 @ /6/ each	1	14
Ẓafarnāmah, Vol. I, Fasc. 1–9, Vol. II, Fasc. 1–8 @ /6/ each ..	6	6
Tuzuk-i-Jahāngīrī, (Eng.) Fasc. 1	0	12

ASIATIC SOCIETY'S PUBLICATIONS.

1.	Asiatic Researches. Vol. VII, Vols. XI and XVII, and Vols. XIX and XX @ 10/ each	50	0
2.	Proceedings of the Asiatic Society from 1865 to 1869 (incl.) @ /6/ per No.; and from 1870 to date @ /8/ per No.		
3.	Journal of the Asiatic Society for 1843 (12), 1844 (12), 1845 (12), 1846 (5), 1847 (12), 1848 (12), 1866 (7), 1867 (6), 1868 (6), 1869 (8), 1870 (8), 1871 (7), 1872 (8), 1873 (8) 1874 (8), 1875 (7), 1876 (7), 1877 (8), 1878 (8), 1879 (7), 1880 (8), 1881 (7), 1882, (6), 1883 (5), 1884 (6), 1885 (6), 1886 (8), 1887 (7), 1888 (7), 1889 (10), 1890 (11), 1891 (7), 1892 (8), 1893 (11), 1894 (8), 1895 (7), 1896 (8), 1897 (8), 1898 (8), 1899 (8), @ 1/8 per No. to Members and @ 2/ per No. to Non-Members		

N. B.—The figures enclosed in brackets give the number of Nos. in each Volume.

4.	Centenary Review of the Researches of the Society from 1784–1883 ...	3	0
	A sketch of the Turki language as spoken in Eastern Turkistan, by R. B. Shaw (Extra No., *J.A.S.B.*, 1878)	4	0
	Theobald's Catalogue of Reptiles in the Museum of the Asiatic Society (Extra No., *J.A.S.B.*, 1868)	2	0
	Catalogue of Mammals and Birds of Burmah, by E. Blyth (Extra No., *J.A.S.B.*, 1875)	4	0
	Introduction to the Maithilī Language of North Bihār, by G. A. Grierson, Part II, Chrestomathy and Vocabulary (Extra No., *J.A.S.B.*, 1882)	4	0
5.	Anīs-ul-Musharrahīn	3	0
6.	Catalogue of Fossil Vertebrata	3	0
7.	Catalogue of the Library of the Asiatic Society, Bengal, by W. A. Bion	3	8
8.	Ināyah, a Commentary on the Hidāyah, Vols. II and IV, @ 16/ each...	32	0
9.	Jawāmlu-l-'ilm ir-riyāẓī, 168 pages with 17 plates, 4to. Part I ...	2	0
10.	Khizānatu-l-'ilm	4	0
11.	Mahābhārata, Vols. III and IV, @ 20/ each	40	0
12.	Moore and Hewitson's Descriptions of New Indian Lepidoptera, Parts I–III, with 8 coloured Plates, 4to. @ 6/ each	18	0
13.	Sharaya-ool-Islām	4	0
14.	Tibetan Dictionary, by Csoma de Körös	10	0
15.	Ditto Grammar " "	8	0
16.	Kaçmīraçabdāmṛta, Parts I & II @ 1/8/	3	0
17.	A descriptive catalogue of the paintings, statues, &c., in the rooms of the Asiatic Society of Bengal by C. R. Wilson...	1	0
18.	Memoir on maps illustrating the Ancient Geography of Kaśmir by M. A. Stein Ph.D., Jl. Extra No. 2 of 1899	4	0

Notices of Sanskrit M[illegible] Fasc. 1–29 @ 1/ each	29	0
Nepalese Buddhist [illegible]rature, by Dr. R. L. Mitra ...	5	0

N.B.—All Cheques, Mo[illegible] &c., must be made payable to the "Treasurer, Asiatic Society," only.

20-6-1901.

[illegible]upplied by V.-P.P.